T.No. 310

शिल्पसंग्रहः - Silpasamgrahah

copied from a ms with no R. 5632-b belonging to G.O.M.L., Madras

Index of the
G.O. Mss. Library (R. 5632-B) Paper Manuscript.

T. No 31. The following underlined subjects are copied.

शक्तिमूलपरिवारलक्षणपटलः।

काश्यपे उपपीठविधानपटलः।

" अधिष्ठानपटलः।

" प्रस्तरलक्षणपटलः।

मयमते वास्तुशास्त्रे प्रस्तरकरणम्।

मानसारे गोमुखलक्षणपटलः।

काश्यपे नालप्रमाणोत्सेधालङ्कारप्रतिष्ठा

कुम्भपञ्जरलक्षणम्।

मानसारउपपीठविधिः।

(1) द्विभुजभैरवः। × Pages. 1, 2.*

विश्वकर्मीये शयनलक्षणम्।

(2) ब्रह्मीय शयनलक्षणम्। × P. 3-9

(3) दीप्तशास्त्रे लिङ्गलक्षणम्। × P. 10-19

मानसारे वृषभलक्षणपटलः।

(4) दीप्तिशास्त्रे लक्ष्मीनारायणपटलः। × P. 20-21

(5) नारायणे गोपुरलक्षणपटलः। × P. 22

अश्वलक्षणम्।

(6) विश्वकर्मपुराणे हनुमत्प्रभव विश्वकर्म- × p. 23-26
प्रभावोपाख्यानं नाम षडशीतितमोऽध्यायः।

मयमते शिल्पलक्षणपटलः।

* Page no.s. given at the bottom.

मयमते गोपुरविधानो नाम चतुर्विंशोऽध्यायः।

काश्यपे दक्षिणामूर्तिपटलः।

Pages.

(7) पौलस्त्ये विश्वसारे दक्षिणामूर्तिविधानो नाम द्वाविंशोऽध्यायः। × — 27 – 30

(8) पञ्चमुखहनुमत्पटलः। × — p. 31, 32

(9) आगस्त्ये सकलाधिकारे त्रिवस्त्रोपपीठकरणं नाम तृतीयोऽध्यायः। × — 33-35

(10) आगस्त्ये सकलाधिकारे दारुसङ्ग्रहण शूलमानविधानो नाम नवमोऽध्यायः। × 35-38

(11) आगस्त्ये सकलाधिकारे बद्धलेपनरज्जुबन्धमुत्कलसंस्कार क्रमविधि दशमोऽध्यायः। × 39-43

(12) आगस्त्ये वर्णसंस्कारो नाम एकादशोऽध्यायः। × 43-44

(13) " अक्षिमोक्षण विधानो नाम द्वादशोध्यायः। × 45-48

Pages 33–48

(14) ब्रह्मयामलम्। (? 49-55 ×

(15) ब्रह्मयामले शुद्धाधि भेद चामुण्डीध्यानपटलः पञ्चमोऽध्यायः। 56-70 ×

p. 49 to 70.

(16) शेषभाष्ये शिल्पार्थसङ्ग्रहे एकतलविधानो नाम द्वाविंशोऽध्यायः। × p. 71–81

काश्यपीये नृत्तलक्षणपटलः।

विश्वकर्मीय आयादि संपदार्थविधानो नाम चतुर्दशोऽध्यायः

P.82-85

(17) नारदीये कृष्णलक्षण पटलः। ×

मयमते उपपीठविधानम्।

" अधिष्ठानविधानम्।

(18) आगस्त्ये सकलाधिकारे त्रिभागोप पीठो नाम तृतीयोऽध्यायः। × P.86-87

मानसारे वास्तुशास्त्रे अधिष्ठान-विधानो नाम चतुर्दशोऽध्यायः।

मयमते वास्तुशास्त्रे द्विभूमि विधानम्।

" " त्रिभूमिविधानम्।

(19) ब्रह्मीय चित्रकर्मशास्त्रम्। × P.88-119

सारस्वतीये गोपुरगण्यमानोऽध्यायः।

" मानसंग्रहविधानम्।

T. No. 310.

श्रीः

शिल्पसंग्रहः

(अनुक्रमण्यामधोरेखाङ्किता भागाः परमत्र
प्रतिलिपीकृताः)

Copied from a Paper MS.
with R. No. 5632 b belong-
ing to GOML. Madras.

॥ द्विभुजभैरवः ॥

ईशो वै द्विभुजं शान्तं सर्वाभरणभूषितम्।
जटामकुटसंयुक्तं शुक्लवस्त्रोद्धितिस्थिति।
शुक्लयज्ञोपवीतञ्च शुक्लपद्मोपरिस्थितम्।
शुक्लं दक्षिणहस्तन्तु कपालं वामहस्तके।
ईशोमेवं समाख्यातं ततो वै भास्करं क्रमात्।
द्विभुजं पद्महस्तञ्च रक्तपद्मासनस्थिता।
रक्तमण्डल संयुक्ता करण्डमकुटान्विता।
रक्ताम्बरधरास्सर्व सर्वाभरणभूषिता।
छन्नवीरसमायुक्ता भास्करा द्वादशैव च।
कर्तानोश्च विवस्वांश्च मार्ताण्डो भास्करो रविः।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः।
आदित्यश्च तथा सूर्य अंशुमाली दिवाकरः।
एते वै द्वादशादित्याश्चोत्तरादि क्रमात्स्थितिः।
त्रिविधः क्षेत्रपालस्तु सात्विको राजसोन्ततः।
श्वेतं रक्तं तथा कृष्णं सात्विकादिगुणं भवेत्।
द्विभुजं चतुर्भुजं शान्तं राजसं षड्कराश्चितम्।
तामसञ्चार्धदोर्दण्डत्रिनेत्रं समपादकम्।
पद्मपीठे तु - - - भद्रपीठे तु वाबयम्।
शूलं दक्षिणहस्ते तु पालाशान्यकरे धृतम्।

द्विभुजञ्चैव माख्यातं चतुर्हस्तमथोच्यते ।
परहस्तन्तु सव्ये तु खड्गाङ्ग खड्गमन्यके ।
अथवा पूर्वहस्ते तु अभयं वरदान्वितम् ।
पूर्ववत्परहस्ते द्वौ खण्डे वामश्च हस्तके ।
सात्विकञ्चैव माख्यातं राजसं शृणु सुव्रत ।
शूलखड्गश्च घण्टाच्च दक्षिणे तु करतये ।
खेटकञ्च कपालञ्च नागवासव दक्षिणे ।
तामसे तु धनुर्बाण दक्षिणे दक्षिणे धृतम् ।
शेषं राजसवत्ख्यातं रक्तकेशाच्च मण्डलम् ।
उग्रदृष्टिसमायुक्तं नानानागविभूषितम् ।
त्रिणेत्रं नग्नरूपञ्च क्षेत्रपालं प्रकल्पयेत् ।
इति क्षेत्रपाललक्षणपटलः

—

॥ ब्रह्मीय शयन लक्षण पटलः ॥

Page. 464 भगवन्पङ्कजानाथ हरे राजीवलोचन ।
शयनासनयोश्चापि सोनेचक्र मप्पङ्कयोः ।
लक्षणं कथयस्वेश तावत्कामादिवास्तुषु ।
पङ्कजानाथ राजीवलोचनं रथि भवान् ।
शृणु ब्रह्मन्गतिष्वेहश्च प्रश्नवशतः क्रमात् ।
P. 465 योगं सृष्टिस्तथा भोगं संहारश्च चतुर्विधम् ।
वृद्धिभूत्याहि .. द्वारार्ध शयनं क्रमात् ।
योगशय्या मुमुक्षूणां प्रयोक्तव्यं प्रयत्नतः ।
पुत्रपौत्रविवृध्यातु नानासृष्टिशयनं मतम् ।
भोगवृद्धिकरं भोगशयनं सर्वकामदम् ।
ब्रह्मस्थाननवांशेशं ध्यात्वा मध्ये समस्तधा ।
अवाच्याञ्च प्रतीच्याश्च उदीच्यां प्राच्यां तथैव च ।
योगशय्या तथा भोग चर्या सृष्ट्यां हि धावति ।
संहारचर्या वेत्यानवातस्या स्युर्यथा क्रमम् ।
प्रासाग्नि पश्चिमद्वारं प्रमुखं पश्चिमालयम् ।
दक्षिणा दिशि तामुदं मल्ल दक्षिणादि मुखम् ।
प्राङ्मुखैस्तारमार्गाणि बाह्ये चैवमुदीरितम् ।
प्राग्द्वारसम्पद्वृद्ध्यै स्यात्सर्वसम्पद्विनाशनम् ।
प्राङ्मुखं पश्चिमद्वारं सर्वसम्पद्विनाशनम् ।
उदग्द्वारं ज्ञानसम्पन्नवर्धनं केवलं मतम् ।

वैराग्यं स्याद्दवस्वारमेवं निर्णयमाचरेत् ।
ग्रामादन्येषु सर्वेषु उत्तरस्य शयनं भवेत् ।
सरस्तटे नदीतीरे योगशय्या विधीयते ।
स्वस्तिकं वृत्तभद्रञ्च वृत्तगेहमवेदिकम् ।
प्रोक्षाग्रहं महाराजा भवतन्तु श्रीप्रतिष्ठितम् ।
P. 466 समस्तालयश्च तैर्योग मातकण्डश्चतुष्पदम् ।
गणिकापिशाकं शुद्धस्वस्तिकद्दवज्रमानकम् ।
एवमाद्यायताग्राणि उत्तलद्यानि (दि) यानि (वै) च ।
शयनादिकेन योग्यानि वृत्तश्च चतुरश्रकम् ।
प्राक् प्रत्यक् शिरशान्तैव प्रष्टयेस्यायवाक्षरा ।
उदक् शिरसमायुक्त शयनं सर्वशून्यकम् ।
वस्तु सर्वशिरोभागं विपरीतविपत्करम् ।
योगशय्याक्रमं वक्ष्ये भृणु त्वं पङ्कजासेन ।
शंखे तु भासुरं शेष योगं शयनमीरितम् ।
गौरश्यामनिभो वाथ पीतश्यामनिभो हरिः ।
अर्चाकयं शयनं प्रोक्तं द्विभुजस्सत्वजो गुणः ।
योगनिद्रासुखे सक्तो रक्तोत्पलदलेक्षण ।
पूजाविष्टरपार्श्वे तु दक्षिणे दक्षिणेतरे ।
भृगु · · पुत्रश्च मार्कण्डेयो दुरेतथा ।
मधुकैटभादसंयुक्तं ब्रह्मा पद्माभिराद्युधैः ।

वन्द्यमानैर्मुनीन्द्रैश्च युक्तं योग्यैर्गमिष्यते ।
मध्यमा पूजनैः स्कन्दौ रसुराभ्यां विना तथा ।
सकर्तादिस्तथा देवैर्नारदादिसमन्वितम् ।
मार्कण्डेयभृगु - भ्य मधुकैटभसंयुतम् ।
पद्मेक्षणरजोगुण्य श्यामश्चापि महाच्युतम् ।
P. 467 रक्तपादान्तशयनं तत्सृष्टिशयनं क्रमात् ।
मध्यमं तनुजं हीनं ताभ्यां मुनि विनाधमम् ।

सृष्टिः —

परिवारान्वितं भोगशयनं वक्ष्यतेऽधुना ।
नागारूढाम्बुजासीनं स्वर्णवर्णं पितामह ।
सपश्चाष्टयुतान्बाह्य पार्श्वयोरुभयोरपि ।
सर्वायुधेन मे केतु स्थापितं हनुजात्मजम् ।
श्रीभूमिसरस्वती शान्त्याश्चतस्रो देव्य एव हि ।
अवाम बाहुपादाब्ज पार्श्वे लक्ष्मीस्सरस्वती ।
वामपादाम्बुजाभ्याशे शान्तभूवरपुष्पवान् ।
सूर्याचन्द्रमसौ व्योम्नि स्थाप्ये तुम्बुरुनारदौ ।
पुरन्दरोऽप्सरोभिस्तु लोकपालः स्थिताम्बिने ।
नरसिंहवराहन्तु पूजाविष्टरपार्श्वकम् ।
मधुकैटभावागतपार्श्वे कर्तव्यौ नवतालकौ ।
तौ क्षीरवर्णसञ्जातौ शेषं शयनता हुता ।

शुक्लपीतनिभः स स्यात् श्यामवर्णो महाच्युतः ।
अर्च्यार्चै-चर्य पृष्टाङ्गौ द्विभुजौ वा चतुर्भुजौ ।
सप्त · पुल्ल (मल्ल) पद्माभं मुखं शङ्गारसंयुतम् ।
पद्मपत्रेक्षाणं पूर्णचन्द्रतुल्यं ससास्थितम् ।
एतदुत्तममुद्दिष्टं भोगाख्यं शयनं मया ।
शान्ति सरस्वती नारसिंहवराहैर्वैविना ।
P. 468 मध्यं स्याद्धमन्तैस्तु देवैर्दनुजहीनकम् ।
ब्रह्मणामायुधं देवे सर्वस्मिन्नेव कारयेत् ।

भोगम् —

अनन्ततास्च्छेशे भाग द्विफणं वलयद्वयम् ।
धूम्रवर्णयुतं शेषं शयनं वा समं भवेत् ।
मीलेक्षणमहानिद्रा तामसा नयनत्रयम् ।
सुवक्तं सुशुक्लाङ्गं श्यामवस्त्रं भुजद्वयम् ।
नीलवर्णसमायुक्तं रुद्ररूपादि मूर्तिकम् ।
ब्रह्मादिभिरविक्षानं संहारं केवलं मतम् ।

संहारम् — सकेशवेति —

शंखचक्रगदाशार्ङ्गखड्गः स्तपनश्च यथामृता ।
पङ्कजं मुसलं नेतु वनमालाष्टसंमता ।
खड्गंच पङ्कजं शान्तं स्त्रीरूपं वनमालिकम् ।
शंखचक्रौ पुमांसौ तु मुसलं दण्डपुंसकम् ।

शंखादि दण्डमालाब्ज मब्जासि धनुर्निभा ।
चन्द्रार्कपीतपिङ्गाब्जनीलमञ्जिष्ठसन्निभा ।
भवशंखो .. भूतात्मा वैनतेयः सुवर्णभाक् ।
मधुकैटभौ मधुश्यामौ विप्रौ सौभाग्यनायकौ ।
चामीकरनिभा लक्ष्मीर्वर्णा किंशुकपुष्पभाक् ।
शान्ते सस्याङ्कुराभासा सस्यश्यामनिभोपरि ।
ज्ञारोदयति भागेंश मध्यमं शयनोदयम् ।
P.469 अष्टांशाधिकमुत्कृष्टं .. शोन्यून त्र्यष्टकम् ।
षट्त्रिंशाङ्गुल श्रेष्ठं पञ्चवाङ्गुलहीनकम् ।
मध्यमञ्चाधमं षट् सप्ताष्टांशेद्यंशवर्धनात् ।
क्रमानि त्रयवेम्नानि मातं वा मध्यमा तता ।
पञ्च सप्त नवाद्यष्ट फणास्तस्य समाहिताः ।
मुखं व्यालसमायुक्तं श्टङ्गमध्ये शिखामणिः ।
सव्यांशं लम्बितं देव बेरश्चारुप्रसारहा ।
नासिव्यालम्बितं कार्यमाभिचारस्य कारयेत् ।
मौलिपट्टाग्रसीमान्तं सव्यहस्तश्च पालवा ।
सव्यञ्च विस्तृतं पादमन्यत्पादन्तु कुञ्चितम् ।
योगशय्या भवेत्सव्य हस्तौ दण्डसपल्लवौ ।
कर्तरी चाभवेद्वामात्सास्फोटं सृष्टिशय्यके ।
दक्षिणा दक्षिणौ पादौ प्रसारितौ कुञ्चितौ ।

दण्डः स्याद्दक्षिणे हस्ते तस्योर्ध्वे मौलिसन्निधेः।
ऊर्वाश्रयोर्वामकरं ततोन्ये कटकं भवेत्।
आकुञ्चितं वामपादं ततोऽन्ये कुञ्चितं स्मृतम्।
विंशं मातान्तरं प्रोक्तं पादाङ्गुष्ठद्वयोरपि।
भागं पार्ष्ण्यन्तरं प्रोक्तं जान्वोच्चन्तु दशाङ्गुलम्।
त्र्यङ्गुलं सन्मुखं तिर्यक् दक्षिणे ब्रह्मसूत्रता।
तद्वामे नाभिवृद्ध्यर्थं शयने शान्तकं शिरः।
P. 470 सङ्गिरोंशीश्च शयनं गोभूधान्यधनक्षयम्।
चापापं पुष्टिदं बेरं धर्मकामार्थसिद्धिदम्।
भोगशय्या सिद्धिसंहारं प्रसृतं शयनं ततम्।
स्वामिनो मरणं कुर्यात् प्रसृतं शयनं क्षणात्।
ब्रह्मसूत्रादिभिर्नाभेर्दक्षिणे सूत्रमूर्ध्वकम्।
ब्रह्मा भीत्याश्रयस्तस्य वामपार्श्वे तु नारदः।
लोकपालस्तथा सप्त मुनयोप्सरसां गणाः।
तस्यैव वामपार्श्वे तु सातोधस्तुम्बुरुस्तथा।
बेरायामे रसांशांशे मुखांशेन प्रमीयते।
ब्रह्मायामं त्रितालं स्याच्छाङ्गं खड्गश्च तत्समम्।
चन्द्रार्कादिन्त चन्द्रार्को मालाब्जमुसलस्तथा।
द्वितालं त्र्यङ्गुलायामं खड्गं सार्धत्रितालवत्।
किन्नराः षोडशाङ्गुलयं त्रयोदशाङ्गुलम्।

. . . . षण्मात्रञ्च चतुर्यवम् ।
गरुडस्यायतं प्रोक्तं मधुकैटभयोस्तथा ।
सषण्मात्रन्तु षट्तालं देव्यो बाहुसमोदयम् ।
नारसिंह्मवराहञ्च तथा देव्योदयं तथा ।
स्तनान्तमपि देवीनां आयामञ्च विशेषतः ।
एतस्मादधिकं हीनं मानहीनं धनक्षयम् ।
नवकोलकविस्तीर्णपद्म पद्मासनासनम् ।
P. 471 चतुर्मात्रोन्नतस्तस्य लम्बः स्यात्कमलस्य च ।
स्यात्तिमात्रोन्नतश्चोर्ध्वे लम्बनस्य विशेषतः ।
मूलादग्राद्दशांशेन शतपत्रमुपर्युता ।
मात्रार्धमाकुमारस्य नालस्य तु विशालकम् ।
नालस्य दक्षिणे पक्षे बालपत्रं प्रशस्यते ।
वामे तु वृत्तपत्रं स्यान्नालं तु त्रिविधं मतम् ।
पत्रनालस्य विस्तारमधस्तादङ्गुलेन तु ।
पद्म मध्ये स्थितिर्धातुस्ततं तद्वारपद्मकम् ।

इति ब्रह्मचित्रे कर्णशास्त्रे
शयनलक्षण विधानो नाम
पञ्चदशोऽध्यायः
श्री.

॥ श्रीः ॥

॥दीप्तशास्त्रे लिङ्गलक्षणपटलः ॥

471 अथातस्संप्रवक्ष्यामि शिवलिङ्गस्य लक्षणम् ।
स्थावरं जङ्गमं चैव द्विविधा लिङ्गमुच्यते ।
शिलामयं तु यद्रूपं ब्रह्मविष्णुहरैर्युतम् ।
त्रिसूत्रं मूलसंयुक्तं स्थावरं लिङ्गमुच्यते ।
सौवर्णे रजते स्थापि स्फटिकाताम्रकैरपि ।
कुर्वीत मणिरत्नाद्यै जङ्गमं लिङ्गमुच्यते ।
जङ्गमं स्थावरं श्रेष्ठं तस्मात्स्थावरमिष्यते ।
सुमुहूर्ते सुनक्षत्रे सुमासे शैलमारभेत् ।
अयनं दक्षिणे नष्टमिष्टश्चाप्युत्तरायणे ।
मेषे वृषे च मिथुने मकरे कुम्भमीनयोः ।
P.472 एषु राशिषु संग्राह्या शिला सम्यग्विचक्षणैः ।
अन्येषु यदि मासेषु शिलारम्भं न कारयेत् ।
कारयेत् कर्तृनाशं स्यात्स्थाननाशं धनक्षयम् ।
पूर्वमासेषु नक्षत्रे चित्रायां स्वातिहस्तयोः ।
त्रीण्युत्तरेषु रेवत्यां श्रावणे कर्कटेपि च ।
मृगशीर्षे च नक्षत्रे कुर्यात्संपत्करं विदुः ।
एषां नक्षत्रयोगेषु लिङ्गारम्भं विधीयते ।
उत्तमश्चैति नक्षत्रे सुदिने कारयेद् बुधः ।
स्थपतिः स्थापकस्तत्र शिलाग्रहणमारभेत् ।
मन्त्रामन्त्रज्ञ शास्त्रज्ञा निमित्तफलकाङ्क्षितम् ।

महानिमित्तं विधिमान् स्थापको योग्य उच्यते ।
स्थपतिः कर्मशास्त्रज्ञः शिलोच्चो भातिशोभितः ।
भूपरीक्षादि तद्विद्वान् स्थपतिः कर्म योग्यकम् ।
तस्मादाचार्यशिल्पिस्तु सहिते कार्यमारभेत् ।
तावेव सहितौ कर्म सर्वसम्पत्करं नृणाम् ।
श्वेतं रक्तञ्च पीतञ्च कृष्णञ्चेति चतुर्विधम् ।
सर्ववर्णेषु संयोग्यं तस्य लक्षणमुच्यते ।
शंखगोक्षीर कुन्देन्दु स्फटिकामौक्तिराजता ।
मल्लिका पुष्पसङ्काशा हरिद्राचूर्णसन्निभा ।
शिलापि तत्समाख्याता कूष्माण्डकुसुमोपमा ।
अञ्जना महिषाक्षाभा नीलोत्पलसमप्रभा ।
P.473 . . . . शिला श्वेता इतीरिता ।
किंशुकञ्च जपापुष्प जातिलिङ्गेन्द्रगोपमा ।
शशासृक्पीत बन्धूक पुष्परक्ताशिलानिभा ।
सुवर्णसदृशा शैलसर्षभा पुष्पसन्निभा ।
हसती पुष्पसङ्काशा हरिद्राचूर्णसन्निभा ।
शिला पीतसमाख्याता कूष्माण्ड कुसुमोपमा ।
अञ्जना महिषाक्षाभा नीलोत्पलसमप्रभा ।
मृगमायूरखण्डाभा माषगुञ्जुसादृशा ।
राजवक्रनिभाश्चैते कृष्णशैला सुखावहा ।

3

श्वेतवर्णेषु या शैल द्विजातीनां प्रशस्यते ।
रक्तवर्णनिभस्योक्ता पीता च वणिजां भवेत् ।
कृष्णशैलन्तु शूद्रस्य वक्ष्यते जातिभेदतः ।
कृष्णवर्णनिभा यातु सामान्य इति कीर्तिता ।
अन्यवर्णशिलायान्तु जातिभेदो न कथ्यते ।
पर्वते सागरे तीर्थे क्षेत्रे चैव वनान्तरे ।
क्षीरवृक्षावृता शैला उत्तमादि विदुर्बुधाः ।
अन्यस्तोने(न)व श्रेष्ठोयाच्छिला वै शास्त्रपारगः ।
पूर्वनक्षत्रे सुमुहूर्ते शैलमारभेत् ।
यस्मिन्देशे शिला स्थितिः आचार्यैः शिल्पिभिः सह ।
474 गच्छेति रम्यञ्जसं प्राङ्मुखो दङ्मुखः क्रमात् ।
शुभाशुभानि शकुनान् तस्मिन् काले परीक्षयेत् ।
विप्रस्य कन्या जगदेकपत्र
शङ्खासवं पूर्णकुम्भाज्ञ फल प्रदीपम् ।
सितञ्च पुष्प (ञ्च) दधि गोवृषञ्च
ध्वजञ्च भेर्य उरगश्शुभानि ॥
रक्तकुम्भशवसे विकीर्ण-
मङ्गुलीयरवरप्रतरूपम् ।
सर्पशलुवरराक्षस पीडा
यत्र दृश्यमशुभञ्च तदाहुः ॥

4

आचार्यैः शिल्पिभिश्चैव वस्त्राभरणशोभितः ।
यस्मिन्देशे शिलास्थितिः प्राङ्मुखो वाप्युदङ्मुखः ।
ततः प्रदक्षिणं कृत्वा दोषादोषान् परीक्षयेत् ।
वातातपानिदग्धश्च मलाक्लिष्टा (म्बुजा) क्षाराम्बुजा ।
दुःस्थानस्था तटस्थश्च कर्मान्तरानियोजिता ।
वल्मीच शर्कराभ्याश्च रूक्षा चाक्षारादिभिः ।
रेखा बिन्दुकलङ्काश्च वर्जयेत्तु विशेषतः ।
सूत्रपादवदाकार लूतपादसमायुता ।
इक्षोरग्रसमाकारा हरिका पञ्चधा स्मृता ।
कलङ्कः कृष्णलोहाभं कृष्णं मृगसमाकृति ।
शिखिपिञ्छसमाकारं कलङ्कः त्रिविधं भवेत् ।
विमलं हेमसदृशं कंसलोहस्य सन्निभम् ।
475 गिरिरूपसमायुक्ता सर्वदोषकराय वै ।
कृष्णशैलसितारेखा सुप्रशस्तेति कीर्तिता ।
कृष्णे कृष्ण न विद्यन्ते श्वेतकृष्णेन गर्हिता ।
हरिता कृष्णशैले तु सितवर्णेन दर्शिता ।
खर्जूरपत्रसदृशा दूर्वास्तम्भाकृतिश्शुभा ।
अन्यथा नेन गृह्णीयाद्धान्यगोनाशनं भवेत् ।
कलङ्कतो गतं ज्ञेयं राजा राष्ट्रविनाशनम् ।
बिन्दुना पुत्रनाशं स्याद्विमलं सा विदुः सदा ।

द्रव्यनाशो धान्यहान्तो तत्र तन्मण्डलाधिपम् ।
एवं परीक्ष्य बहुधा कर्तव्यं लक्षणैस्सह ।
एकवर्णा शिला ग्राह्या बहुवर्णान्न गृह्यते ।
गृह्यते बहुवर्णानां सर्वदोषाणि कारयेत् ।
स्त्रीपुंनपुंसकश्चैव बाला वृद्धा तु मध्यमा ।
स्वरभेदैराकृतिभेदैर्वरमैक्ष्यापि लक्षणम् ।
भाण्डशब्दं तु पुंलिङ्गं स्वरभेदेन पुत्रका ।
तालशब्दन्तु यच्छैलं तच्छैलं युवतिर्भवेत् ।
दीर्घशब्दन्तु या वृद्धा ह्रस्वा बाला इति स्मृता ।
एवं स्वरस्य लक्ष्यास्तु प्रहरैः शिल्पिविद्यया ।
चतुरश्रमथाष्टाश्रं स्त्रीशैलमिति कीर्तितम् ।
दशाद्वादशाश्चाश्रं आयाताश्रन्तु या शिला ।
476 वृत्तायतन्तु यच्छैलं तत्पुमानिति निश्चयम् ।
वृत्तरूपन्तु यच्छैलं तच्छैलन्तु नपुंसकम् ।
दशाद्वादशकोणन्तु बालवृद्धे तु वर्जयेत् ।
पुंलिङ्गं लिङ्गमित्याहुः स्त्रीलिङ्गं पीठिका मता ।
पादाधारशिलायान्तु नपुंसकमिति स्मृतम् ।
पुंलिङ्गनिर्मितं पीठं राजराष्ट्रभयावहम् ।
स्त्रीशैलनिर्मितं लिङ्गं सर्वप्राणिभयङ्करम् ।
लिङ्गं वा पीठिकावापि स एकेनैव कारयेत् ।

6

दुर्भिक्षन्तु भवेत्तत्र यजमानो विनश्यति ।
तस्मात्तु पूर्ववज्ज्ञात्वा कुर्याल्लिङ्गं विशेषतः ।
सर्वलक्षणसंयुक्तं राजराष्ट्रविवर्धनात् ।
पूर्वपश्चिममायामं तथा वै दक्षिणोत्तरम् ।
पूर्वमग्रापरं मूलं दक्षिणे मूलमुत्तरा ।
शिरोभागमुखं वक्ष्ये अधोभागं विधीयते ।
हृदयभागे तु पृष्ठं स्यात्कारयेन्मतिमान्नरः ।
प्रासादस्य वशाल्लिङ्गं वशाद्गर्भवशन्तु वा ।
गर्भगेहान्तरे सूत्रलिङ्गं स्थाप्यन्तु वावके ।
यद्वारविस्तृतं कुर्यादेकविंशति भागिकम् ।
मध्यभागं त्रिधा भज्य द्विभागं दक्षिणे न्यसेत् ।
तद्भागे ब्रह्मसूत्रं स्यात्तन्मध्ये स्थाप्य देवताम् ।
477 वामदक्षिणमित्याहुर्ब्रह्मसूत्रान्तरं गतम् ।
यावल्लिङ्गस्य नाहं स्यात्पञ्चविंशति भागिकम् ।
चतुर्विंशति भागं वा पञ्चादश विभागिकम् ।
तद्भागे चैकमेवोक्तं ब्रह्मसूत्रान्तरं गतम् ।
तन्मध्ये तु शिवं स्थाप्य स्थाप्यमन्यं न कारयेत् ।
कारयेत् कर्तृनाशं स्यात्स्थाननाशं धनक्षयम् ।
तन्मध्ये स्थापयेल्लिङ्गं सर्वदोषाणि कारयेत् ।
यस्य गर्भन्तु गेहं स्याल्लिङ्गं तत्सेधन्तु कन्यसेत् ।

7

नवभागस्य पञ्चांशं मध्यमं लिङ्गमुच्यते ।
लिङ्गस्योत्तमतस्तस्मिन्नधमाधममुच्यते ।
गर्भमानेश्च यल्लिङ्गं कारयेत्तु विचक्षणः ।
एकहस्तप्रमाणन्तु हीनं लिङ्गं न कारयेत् ।
कारयेज्जङ्गमं लिङ्गं स्फटिकामयमेव च ।
कारयेदविशेषेण स्थानभ्रंशे भवेत्तदा ।
एवं लिङ्गोदयं चोक्तं वक्ष्यते लिङ्गविस्तरम् ।
आयामं यस्य लिङ्गस्य तत्समं नाहमुच्यते ।
उत्तमोत्तमलिङ्गस्य विष्कम्भन्तु विधीयते ।
तद्विष्कम्भन्तु वा कुर्यात्कृत्वैकं वसुभागिकम् ।
एकैकं लिङ्गविष्कम्भं नवलिङ्गस्य मुच्यते ।
तद्विष्कम्भन्तु मानेन त्रिगुणन्तु त्रिपञ्चकम् ।
478 कृत्वा भागैकमाधिक्यं सर्वेषां नाहमुच्यते ।
समखण्डं वर्धमानं शैवाधिक्यं त्रिराशिकम् ।
चतुर्विधं लिङ्गमित्याहुश्चातुर्वर्ण्येषु योजयेत् ।
द्विजानां समखण्डं स्याद्वर्धमानं नृपस्य तु ।
वैश्यानान्तु शिवाधिक्यं शूद्राणान्तु त्रिराशिकम् ।
शिवाधिकं वर्धमानं सामान्येन विधीयते ।
लिङ्गायामं त्रिधा कृत्वा अधोभागं पितामहम् ।
वैष्णवं मध्यभागन्तु शैवभागन्तदूर्ध्वकम् ।

चतुरश्रं भवेद्ब्राह्ममष्टाश्रं वैष्णवं भवेत् ।
तथा शैवभागन्तु वृत्तं संकल्प्यते त्रिधा ।
ब्रह्मवैष्णवमीशानां त्रिभागं सममेव तु ।
आयामं तस्य नाहं स्यात्समखण्डेति विद्यते ।
उत्तमं त्रीणि लिङ्गन्तु वर्धमानमिति स्मृतम् ।
यस्य लिङ्गस्य चोत्सेधं चतुर्विंशति भागिकम् ।
सप्तभागं भवेद्ब्राह्ममष्टभागन्तु वैष्णवम् ।
नवभागं शिवांशं स्याल्लिङ्गं स्याद्वर्धमानकम् ।
कन्यसा त्रीणि लिङ्गन्तु शिवाधिकमिति स्मृतम् ।
उत्सेधं दशभागं स्यात्त्रिभागं ब्राह्ममुच्यते ।
मध्यमं त्रियविष्णवंशं चतुरंशं शिवं भवेत् ।
आयामन्नव मात्रन्तु वृत्तं षड्भागमुच्यते ।
479 सप्तभागमथाष्टाश्रं चतुरंशोष्टभागिकम् ।
एवं नाह त्रिभेदं स्यादेतत्त्रैराशिकं भवेत् ।
चतुरश्रं ब्रह्मतेज अष्टांशं विष्णुमंशकम् ।
शैवं वै षोडशाश्रन्तु पश्चाद्वृत्तमतः परम् ।
छेदये द्विद्विभागेन छेद्यन्तु त्रितयात्मकम् ।
लिङ्गविष्कम्भमानेन समं वै चतुरश्रकम् ।
तत्कण्ठार्धं परिग्राह्य कोणाभ्यां लाजयेत्तदा ।
अष्टाश्रकन्तु तात्सिद्धं मन्त्रा चोद्धृस्त वृत्तकम् ।

९

नपुंसकं ब्रह्मभागं मध्यमं स्त्रीति विद्यते ।
ऊर्ध्वे पुमानिति ख्याते एवं सङ्कल्पयेत्पुनः ।
नन्द्यावर्तशिला योग्या पूर्वे वा वपरेषु च ।
मध्यमं युवती ख्यातमष्टबन्धं प्रबन्धयेत् ।
ऊर्ध्वभागन्तु पूजांशं शिवमानोति कीर्तितम् ।
विस्तारन्नाहमुत्सेधं लक्षणन्तु प्रकारयेत् ।
मानहीने महाव्याधिरधिके शत्रुवर्धनम् ।
नाहहीने धारिद्राणां शिरोहीने महद्भयम् ।
मूलहीने विनाशाय सूत्रहीने कुलक्षयम् ।
उत्सेधमानहीनन्तु सर्वप्राणिभयङ्करम् ।
छत्राकारन्तु विप्राणां प्रथमं लक्षणं भवेत् ।
कुक्कुटाण्डं भवेद्राज्ञां द्वितीयं लक्षणं भवेत् ।
अर्धचन्द्रन्तु वैश्यानां तृतीयं लक्षणं परम् ।
चतुर्थं लक्षणं प्रोक्तं शूद्राणां त्रपुषाकृति ।
कृत्वा लिङ्गशिरस्थाने तद्भागेन समं भवेत् ।
सार्धेनान्तं द्विभागेन वर्तुलं त्रपुषाकृति ।
लिङ्गतारं त्रिधा भक्त्या द्विभागान्तन्तु वर्तितम् ।
अर्धचन्द्रमिति प्रोक्तं सर्वकामफलप्रदम् ।
लिङ्गताराष्टकं भक्त्या भागवर्धेन वर्धितम् ।
चित्रशीर्षमिति प्रोक्तं सर्ववर्णेषु योग्यकम् ।

कुक्कुटाण्डं भवेत्तत्र विस्तारार्धेन वर्धितम् ।
एवं लक्षणमित्युक्तं कारयेन्मतिमान्नरः ।

इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे
लिङ्गलक्षणपटलः ॥

श्री

॥ दीप्तलक्ष्मीनारायणम् ॥

502 अतः परं प्रवक्ष्यामि लक्ष्मीनारायणं शृणु ।
सर्वलक्षणसंयुक्तं सर्वकामफलप्रदम् ।
ग्रामे च नगरे चैव तटाके दीर्घसङ्गमे ।
पर्वते च वने पार्श्वे सङ्गमे तु शुभावहम् ।
सर्वद्रव्यकृतोक्तं च आलये तु शुभप्रदम् ।
दिशासु स्वादिशाश्चैव ग्रामे प्रोक्तं शुभावहम् ।
अङ्गुलत्रयसंयुक्तमायादिशोषयेद्बुधः ।
उत्तमं दशतालेन सर्वावयवकल्पनम् ।
अन्यत्पूर्वोक्तमानेन सर्वलक्षणसंयुतम् ।
किरीटाभरणैर्युक्तं रत्नकुण्डल~~मण्डितम्~~ संयुतम् ।
पीताम्बरधरैर्युक्तं रक्ताम्बरधरन्तु वा ।
अभयं दक्षिणं हस्तं वरदं वा विशेषतः ।
वामहस्ते तु श्रीदेवीमालिङ्गन्तमथोच्यते ।
503 शङ्खचक्रधरैर्युक्तं पद्महस्तं विशेषतः ।
ऋजुसूत्रसमायुक्तं पद्मामाङ्घ्रिप्रसारितम् ।
यद्वेरनाभिमात्रं तु हृत्पद्ममालिङ्गनन्तु दक्षिणे ।
अथवा करद्वयं चैव भद्रहस्तत्वमेव च ।
करण्डिकामकुटं वापि केशबन्धमथापि वा ।
पुष्पकुण्डलसंयुक्तं रत्नकुण्डलमेव च ।
छन्नवीरसमायुक्तं हारकेयूरभूषितम् ।

कटकादि भद्रहस्तञ्च बाहुवलयादिशोभितम् ।
अन्यपार्श्वे वामनेत्रे सिते वामपुटान्तके ।
हनोपसव्य पार्श्वे तु नाभेश्च दक्षिणे प्रलम्बयेत् ।
परस्परनिरीक्षयन्तु भोगभोगादि सुन्दरौ ।
अनुसूत्रन्तु देवीनां जायतन्तु चरेद्दया ।
एवं देवस्य मूर्तेव ज्ञानमेवं विशेषतः ।
पद्मासिंहासनञ्चैव -
नागेन्द्राभरणसंयुक्तौ सोमसूत्रैश्च संयुतम् ।
सनकादीनां सनत्कुमारसहितं भवेत् ।

इति दीप्तिशास्त्रे
लक्ष्मीनारायणपटलः

॥ नारायणगोपुरम् ॥

Page 503 द्वारपादेवयोगेन भागं कुर्यात्त्रिभागता ।
उपपीठोदयं चाद्रौ भागमेव मसूरकम् ।
P. 504 तद्द्वयं पादतुङ्गं च कुर्यादेकोनविंशतिः ।
भागं तद्द्वारपार्श्वे च सप्तभागोपपीठकम् ।
वेदभागमधिष्ठानमष्टभागाङ्घ्रितुङ्गकम् ।
द्वारपादोदयेकोनत्रिंशद्भागं विभाजिते ।
अष्टांशमुपपीठो(च्च)त्वं सप्तांशं तु मसूरकम् ।
तद्द्वयं पाददीर्घं स्यात्कारयेल्लक्षणान्वितम् ।
द्वारपादोदय चातु पङ्क्तिभागं विभाजिते ।
उपपीठं शरांशन्तु वेदभागमसूरकम् ।
अधिष्ठानाद्द्विगुणमङ्घ्रितुङ्गमेवं प्रकल्पयेत् ।
अधिष्ठानं वेदभागन्तु वसुभागाङ्घ्रितुङ्गकम् ।
पञ्चांशश्चोपपीठोच्चं द्व्यंशाधिष्ठानमानतः ।
मूलप्रासादमधिष्ठानतुङ्गं वा द्व्यर्धं द्विगुणं
त्रिगुणोन्नतम् । द्वारशालोपपत्तीति । अथवा
सर्वमानेषु हस्तमानद्वयं पीठं वस्तु स्वामि-
नाशं करोति -
अधिष्ठान सर्वपीठेन भुक्तिमुक्तिफलप्रदम् ।
इति नारायणे गोपुरलक्षणपटलः

॥ श्रीः ॥

विश्वकर्मपुराणे हनुमत्प्रभव विश्वकर्म-प्रभवोपाख्यानम्

— ० —

Page. 506 पुरा कृतयुगे केचि ऋषयश्च दृढव्रताः ।
पप्रच्छुः षण्मुखं वाचमीश्वरस्य सुतं विभुम् ।
देवदेवत्वमाचक्ष्व विश्वकर्म सुरेश्वर ।
कथं कपित्वजं पूर्वं हनुमान्केन हेतुना ।
पताकाशिखरे तस्य स्थितो वायुसुतः कथम् ।
एतदाचक्ष्व नः सर्वं विस्तरेणेश्वरात्मज ।
इति पृष्टो महातेजाः षण्मुखो वाक्यमब्रवीत् ।
शृणुध्वमृषयस्से वै विश्वकर्मपराक्रमम् ।
षण्मुख उवाच —
आहु दीर्घतपः पूर्वं गौतमो भगवानृषिः ।
अहल्या तस्य भार्या तु सतीनामुत्तमोत्तमा ।
तस्या जज्ञेऽर्जुना नाम कन्या रूपसमन्विता ।
यः पूर्वं कारणे नन्द्या सैव वायोः कुटुम्बिनी ।
न्यग्रोधमूले हृष्टार्थं तपस्यन्ती स्थितस्सदा ।
एतस्मिन्नन्तरे शम्भुः कैलासशिखरात्तदा ।
दिदृक्षया हि लोकानां गगनान्तरमास्थितः ।
दृष्ट्वा मर्कटसंयोगं कारणात्स्खलितेन्द्रियः ।
मुमोच वीर्यं तद्देव अञ्जनाञ्जलिमाविशत् ।
507 सा वायुदत्तमाहारमिति बुद्ध्या ह्यभक्षयत् ।

२

तद्वीर्यमञ्जनाकुक्षिमाश्रितं सद्य एव हि ।
नवभिर्घटिकाभिश्च स्तम्भीभूतमवर्धत ।
तद्गर्भभारात्खिन्नाङ्गी सस्मार पवनं पतिम् ।
देवानां भूतमन्वायुब्रह्मविष्णुमहेश्वरान् ।
ब्रह्मविष्णुमहेशादीन् वायुः प्रार्थितवांस्तदा ।
तस्या गर्भस्थितं सूनुं पप्रच्छुस्ते सुरोत्तमाः ।
कोपवान् कस्य वेदास्तु बान्धवं · · · सुरैः ।
पूर्वं गर्भस्थं शिशुः प्राविशत्
पुत्रदोषोऽस्ति हा पूर्वं इति पाङ्क्सुरेश्वरम् ।
ते प्रोचुर्देवतास्सर्वे गर्भस्थः पुरुषः प्रभो ।
निर्गच्छन्ति यथैवास्या · · त्रिरूपमङ्गलम् ।
नाभिनिचर्मचर्यां प्राणस्थानप्रथं सदा ।
यतिस्सुवर्णकौपीनं ब्रह्मसूत्रं च कुण्डलम् ।
दातुमर्हीति मे यूयं नि· ·श्चामित धाम्यहम् ।
इत्युक्ते शिशुना देवा मन्त्रयाञ्चक्रिरे मिथः ।
न वयं दातुमेतानि समर्था विश्वकर्मणा ।
अविसामर्थ्यमितेषां दानेनास्य महात्मना ।
इति निश्चित्य मनसा स्मरणान्तस्य चक्रिरे ।
नारायणस्मरणा –
५०४ नमो नमस्ते जगदीश्वराय वेदान्तवेद्याय दिगम्बराय

विश्वप्रपञ्चाय गुणाधिकाय तद्विश्वकर्माय नमो नमस्ते ।
இப்படி ஸ்மரணம் செய்கையில —
स्मरणाद्विश्वकर्मेशो मेघवाहनमाश्रितो ।
शङ्खं चक्रं त्रिणेत्रञ्च दशभिर्बाहुभिर्युतम् ।
पुस्तकं लेखनीं चैव हस्तदण्डं वरं भवेत् ।
बीजापूरञ्च सर्वञ्च अक्षमालां कमण्डलुम् ।
शूलं सुदर्शनञ्चैव जटामकुटशोभितः ।
दिव्याभरणसंयुक्तो दिव्यमाल्याम्बरावृतः ।
प्रादुरासीन्महातेजा विश्वकर्मा जगत्पतिः ।
हृष्टैव ब्रह्मरुद्राद्या देवास्ते विश्वकर्मणे ।
वृत्तान्तं सर्वमाचख्युस्तच्छ्रुत्वा विस्मयं गतः ।
उवाच वचनं गर्भे तिष्ठन्तं पुरुषं तदा ।
सुवर्णकटिसूत्रञ्च कौपीनं कटिसूत्रकम् ।
गर्भस्थिताय ते सर्वं सुवर्णौ कर्णकुण्डले ।
यदि तद्यात तते मद्रा किं भवान् कर्तुमर्हति ।
इत्युक्तस्तु ब्रह्मचाद्यं पुरुषो विश्वकर्मणा ।
इत्युक्ते पुरुषे नाथ विश्वकर्मा महामतिः ।
सस्मार मनसा सर्वं तत्त देवा बभूव हि ।
निर्गतं काञ्चनं क्रौञ्च कौपीनं ब्रह्मसूत्रकम् ।
509 आदाय कपिरूपेण सुवर्णौ कर्णकुण्डले ।

4

निर्गमान्तस्य पुत्रस्य पितरौ मोदमीयतुः
ततो देव महेन्द्राद्याः सन्तुष्टा विश्वकर्मणा।
तुष्टुवुर्विश्वकर्माणं सृष्टिस्थित्यन्तकारणम्।
हनुमानपि संहृष्टो ध्वजारूढः स्थितः प्रभो।
मातृगर्भो हन्यमन्यूनां रजते हेमकुण्डले।
प्रसूति जितेन्द्राणां सर्वाङ्गं लिङ्गमुच्यते।
स्वरूपं शतधा कायहस्तकम्प युगे युगे।
इति सर्वं मयाः पूर्वमुमापते -
तत्सर्वं भवतामद्य मया चोक्तमृषीश्वराः।
भूलोकमनुजानां हि तासां पुत्रप्रदं शुभम्।
भूतयन्म महात्मानो भवन्तु विगतज्वराः।
इति मां षण्मुखेनोक्तां कथां पुण्यप्रदायिनीम्।
ये शृण्वन्ति मनुष्यास्ते पुत्रपौत्रसमन्विताः।
दीर्घायुषो महाभागा धनधान्य समाकुलाः।
पूर्वदोषविनिर्मुक्ताः प्रभावाद्विश्वकर्मणः।
भवन्ति मनुजाः पुण्यां कथां संशृणुनु भुवि।

इति विश्वकर्मपुराणे हनुमत्प्रभव
विश्वकर्मप्रभावोपाख्यानं नाम
षडशीतितमोऽध्यायः॥

श्री

पौलस्त्ये विश्वसारे दक्षिणामूर्तिविधानम्

—— o ——

Page-529 समुदितमुनिसेव्यं धर्मनिर्माणदक्षं
शुभदविनतगात्रं विद्रुमाभ्रिबाणम् ।
सुरवरनतमाद्यं दक्षिणेशं त्रिणेत्रं
सकलभवनवन्द्यं सम्यगेवन्तदुच्ये ॥
सव्यं सव्याच्चरणाच्चरणं बालबन्धयाग्रपूर्वाग्रसंस्थितं
वामजं सामे पिशाति शायितं [illegible]स्तकं सव्यहस्तम् ।
सव्याख्यानन्तदितरवरं पुस्तकं वापि दण्डं
तज्जानुसात्तनुच्चैतदार्ध्वजुवत्कम् ।
पार्श्वे सव्यं कटकरमदं साक्षमालाञ्च दन्त्यः
सार्हिसाग्निमकुटमपि शतं तज्जटामण्डितम् ।
केशं कीर्णं पुनरक्षो जटामण्डलं कुण्डलं वा
कर्णद्वयेशं शंखपात्रं विरहितमथवा केवलं कर्णनासा
... ग्रणकेशानि विवर्ज्य देवं शार्दूलचर्माम्बर-
मावहन्त्रुद्राक्षाबद्धीकृतकर्णमाला भस्माङ्गरागं
वटवृक्षाग्रष्ठं कुर्यात् - अपस्मारतनू वारेष्ठम-व्याल-
म्बिताग्रे स्थलमर्पितव्यं मातं व्याख्यानहस्ताङ्गुलि-
सूचकान्तं तत्पार्श्वतो निनाभि युतपट्कानभैवरं
विंशतस्याङ्गुलानं फालस्य सव्येन नासापुटान्ते
ह्रधरस्य सव्ये ।

P.530 हिक्कालवामे हृदयस्यवामे नीत्वा यवीन्द्रं त्वथ योनिमध्यम् ।

पूर्वन्तु सूत्रं प्रतिलम्बितव्यमित्थं विदध्याच्च विधिप्रवीणैः।
अत्यर्थमात्रान्त मानमुक्तं यज्ञोपवीच्चरमुत्तरीयम्।
सव्ये सोमञ्जम दाग्ने नारदवासिष्ठ भृगवश्च परे।
भारद्वाज धटौ ध्रुवश्च शुनकाः श्रीपादसेवापराः
धर्माधर्म विधान निर्णय विधिं ज्ञातुं शिवादेश्च वः।
रोमाञ्चाञ्चित विग्रहं समुदितं व्याख्यानरूपाञ्चितं
वीणाविनोदोद्यतमेतदेव्यं हे भोपयुक्तं सविलासमीशम्।
सव्यं करं तत्कञ्च धरसमधोमुखं वामकरं
तदूर्ध्वे वीणाधरं दक्षिणगोरुबाह्ये वगी-
ङ्कुलं वाम भुजस्य बाह्ये। सव्येच पादं मणि-
बन्धपार्श्वे तलाङ्कुलं षट्कमुद्र· त्तदध्विहितश्च वीणा।
वीणाविनोदं कथितं मुनीन्द्रैर्वीणाविहीनञ्च तथैव सेव्यम्।
तज्ञानमुद्राभयदं करञ्च वामोर्ध्वजानूर्ध्वगतं प्रसह्य।
वामञ्च हस्तं सहिताङ्गरागं सव्येक्षमालापरहस्तके स्यात्।
p.53| अन्यत्सरोजञ्च समुत्पलं वा शेषाणि पूर्वोक्तवदाचरेयुः।
तज्ञानमुक्तिं कथितं विधिज्ञैरन्योन्यमाद्भिङ्कितलं स्विगस्तम्।
तज्ञानमुद्रां स्वकरं हृदिस्थमभ्यन्तरं तत्तलमाहितव्यम्।
मेढ्रं हि मूले वरदं हि वाममृज्वागतं शास्त्रमतीवशान्तम्।
नासाग्रसापेक्षा तु नीचलाक्षं सव्येपसव्येक्षसृगब्जमूर्ध्वे।

3

पूर्वेण · लम्बिजटाकलापमात्मानमात्मन्यवलोकयन्तम् ।
योगोपयुक्तं न च योग्यलभ्यमित्थं विदुर्यो विदधीत विद्वान् ।
बुद्ध्याभिवृद्ध्यै परयोगयोगमूर्तिमालम्ब्य
सव्यमपरश्चरणं तदन्यत् । किञ्चित्समुद्धो-
त्कुटिकासनं स्यात्तद्योगपट्टं न च बन्धनीयम् ।
गोतश्च रम्योत्कुटिकाङ्घ्रिकोद्धं
वामाङ्घ्रिजानूर्ध्वगतश्च वामम् ।
हस्तं प्रसार्यन्तमनुक्तशेषं
प्रागुक्तमार्गेण समाननीयम् ।
योग्यासितश्चैव समं मनुष्य मूर्वोश्च . . .
धन्यधिरोप्य पार्ष्णी तं धोन्यमुभौ च हस्तौ ।
सम्यक् प्रसार्यौ त्वथ पूर्वहस्तौ
जानूपरिष्टाच्च निधापितौ द्वौ ।
सव्ये परेणापि तलेऽक्षमाला +
वामेऽपरे चायकमलञ्च ।

P.532 भास्वज्जटामण्डलयुक्तिमास्मिन्
करीटिकार्धेन्दुविभूषितः स्यात् ।
कण्ठे च तालं हौं सिताङ्गरागं
रुद्राक्षमालापरिभूषिताङ्गम् ॥

तस्यापरस्सोपि वृषाद्दिराधो-
शारण्यानेतत् बहुधा बभूव ।
तपश्चराणां फलदस्तपोभिः
अवृष्य एवैष जगच्छरण्यः ।
तथापि कामेन च केन योगिनां
ततान यः पातु भवन्तमीशः ।
इति पौलस्त्ये विश्वसारे
दक्षिणामूर्तिविधानो नाम द्वाविंशोऽध्यायः ।

पञ्चमुखहनुमत्पटलः

Page-535 अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरम् ।
आकृतिं देवदेवस्य स्थानकश्चास्य शृणवाभिः ।
पञ्चवक्त्रं महाज्ञेयं त्रिपञ्चनयनैर्युतम् ।
सूर्यकोटिकराभासं कपिवक्त्रं सुतेजसम् ।
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ।
अस्यैव दक्षिणं वक्त्रं नारसिंहं महाबलम् ।
सूर्यनाग.प्रधमनं विषभूतनिकृन्तनम् ।
अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ।
पश्चिमं गरुडं वज्रतुण्डं महाबलम् ।
उत्तरं सौकरं वक्त्रं कृष्णदीप्तन्तमोपहम् ।
पातालसिद्धिदातारं ज्वररोगादिकृन्तनम् ।
ऊर्ध्वं भयानकं घोरं नानावान्तकरं परम् ।
येन वक्त्रेण विप्रेन्द्रतत्कारुण्य महावने ।
कुर्वन् सत्वरनादेन पातयामास वारितम् ।
खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम् ।
P536 रन्ध्रगौमुद्रिका मुण्डं दशमं मुनिपुङ्गव ।
वेद्यो · न्यायुधानि धारयन्तं महाकपिम् ।
प्रेतासनोपविष्टन्तु सर्वाभरणभूषितम् ।

2

दिव्यमाल्याम्बरधरं दिव्यरत्नैर्विभूषितम् ।
एतत्पादं परं गुह्यं सर्वपापहरं परम ।
सर्वशत्रुक्षयकरं सर्वऋद्धिमवाप्नुयात् ।
॥ इति पञ्चमुखहनुमत्पटलं समाप्तम् ॥

॥ श्रीः ॥

॥ आगस्त्ये सकलाधिकारः ॥

— ० —

Page. 536 भारत्या कठतस्तुति स्मर. वायुं पाणिस्थ पादाञ्चलं
पौलोमीधृतचामरं वसुमतीदीप्तस्य पार्श्वद्वयम् ।
प्रत्यासन्ननिषण्ण पर्वतसुतासल्लापफुल्लाननं
पद्मावासीनि तावकं विजयते वीरासनाध्यासितम् ॥

~ गोपुरद्वारम् ~

ततस्ताभ्याञ्च बाहुभ्यां दधानञ्चापसायकम् ।
ऊर्ध्वाभ्यां शंखचक्रौ तु जया रामचतुर्भुजम् ।
गोपुरद्वारसंयुक्तं दक्षिणं वाममेव च ।
प्रथमञ्चाग्नि कोणेषु द्वितीयं नैरृत्यभागिकम् ।
तृतीयं वायुदिग्भागे चतुर्थ ईशान्यमेव च ।
ईशान्ये प्रथमं स्थाप्य स्थाननाशं धनक्षयम् ।
वायव्यमल्पभोगं स्यात् कृत्वापि मरणं ध्रुवम् ।
वायुभागं प्रतिष्ठे तु धनधान्यसमृद्धिकम् ।
P. 537 अग्निभागे प्रतिष्ठायामाचार्यं शिल्पिभेदिनम् ।
मूलप्रासादतः कुर्याद् द्वारस्तम्भस्य लक्षणम् ।
उत्तमं मध्यमं प्रोक्तमधमं स्तम्भ प्रतिष्ठितम् ।
द्वारोत्सेधे रसभागे तु गुणांशमुपपीठकम् ।
एकांशन्तु तलोत्सेधं द्विगुणं पाददैर्घ्यकम् ।
वेदांशं प्रस्तरोत्सेधं तिर्यग्रादीनि पूर्ववत् ।

~ त्रिवर्गपीठम् ~

२

आताधिष्ठान तुङ्गं स्यात्समं पादार्धमेव च ।
एकांशन्तु तलोत्सेधं द्विगुणं पादोदैर्घिकमाच्छयं भवेत् ।
एतदर्धार्धं प्रद्वयं वा तत्पञ्चादशमानकम् ।
पञ्चसप्ततिमानन्तु प्रत्येकन्तत्पृथक् पृथक् ।
प्रासादे मण्टपे चैव गोपुराणां विधीयते ।
उपपीठगण्यमारव्यातं त्रिवर्गन्तु विधीयते ।
आप्तोत्सेधांश मानेन सर्वालङ्कारशोभितम् ।
नरनारीनाटकोपेतं चतुष्पाद विभूषितम् ।
नानापञ्चरसंयुक्तं नानातोरणसंयुतम् ।
भद्रं वाथ सुभद्रं वा अधिष्ठानं विधीयते ।
धातुः पादस्य निष्क्रान्तं दण्डं दण्डैकवर्धनात् ।

p. 538 - - - - - दण्डे पादसमं भवेत् ।

अधिष्ठानस्य चोत्सेधं दशभागं विधीयते ।
अंशमंशेन निर्गम्य मानं वा शान्तवीचिक्रमात् ।
यथाबलं यथाशोभं यथा सौन्दर्यमाचरेत् ।
यत्रैव मूलकरणं - - खलु पाद बन्धनम् ।
प्रत्यग्र बन्ध माराग्र जरायोग्यं सामान्यरूपक-
विशेषणान्न युक्तम् । यद्वारि तत्प्रातितलाग्वेद
निष्टं स्यात्स्तम्भं व्यासार्धबाह्यं द्वित्रिदण्डा-
ति निर्गतम् पादुकात्पादजगत्यास्तगुद्वदवम

३

यथाशोभं यथा कुर्यान् ।
विचक्षणैश्च सर्वेषां प्रवेशश्चापि निष्क्रमम् ।
खनमानितलो चोर्ध्वे देवानां स्थापनं शुभम् ।
ततिभागस्य भागेन उदवाभिष्ठान मिष्यते ।
इत्यागस्त्ये सकलाधिकारे
त्रिवस्वोपपीठकरणन्नाम तृतीयोऽध्यायः ॥

श्री

दारुसंग्रहणं शूलं बेरयोर्वक्ष्यतेधुना ।
चन्दनस्तम्भमालाच खादिरश्शिंशिपस्तदा ।
तिन्दुकश्च करीषश्च सोमो राजादनस्तदा ।
मधुकं पत्रकं चैव यत्पाका सप्तपर्णकम् ।
सोमवल्कुब्ज इत्येते सकपे शूलबेरयोः ।
P. 539 श्रेष्ठभूमिसमुत्पन्ना सिद्धन्यार प्रशंसिता ।
पद्मसारश्च न ग्राह्या रूक्षासारश्च मध्यमा ।
द्वित्रिशाखा शिरश्शून्या शीर्णपर्णाजकोटरा ।
महाम्भश्चाथ संशुष्का यद्भागं प्रतिमेव च ।
प्राणषट्पद सच्छिद्रा सप्राणश्च सवृश्चिका ।
अपुष्पा फलपर्णान्त वाताशनि हता ष्टका ।
सपत्रा जीर्णतरुणा नानापाक्षि समाश्रिता ।
सवल्मयाकृतिवल्लीका चण्डाला वाथ संश्रिता ।

4

देवालयसभाचैत्यपथजाता स्वशौनका ।
सरोगावससंयुक्ता दध्याच्याग्राह्य भूरुहा ।
शुभभूमिसमुत्पन्ना मध्यमाच वसान्वितम् ।
पुष्पपल्लवसंपन्ना च्यातश्चाथ मनोहरम् ।
जवोर्वा निर्वाणजातिवृक्षैरावृतशोभितम् ।
स्त्रीपुन्नपुंसका वृक्षाआचरेत् स्त्रीणां भूरुहैः कुर्यात् ।
नै· नेपुंसकाप्रशस्तनक्षेत्रेशिल्पिनां विना
सत्ये नृपेकेवृक्षमूलेन चेत्य लक्षये
क्षीरितो यस्य वै श्रेष्ठं त्वेभ्रा तत्वाशुभं भवेत् ।
पूर्ववृक्षमुखं ज्ञात्वा वामदक्षिण पृष्ठका ।
ज्ञात्वा पूर्वोत्तरे पृष्ठं पादश्चान्य प्रदेशके ।
प्रशस्तं भूरुहं प[illegible] चागच्छेदन मार्नजवम् ।
P.540 कृत्वावटेच प्रच्छाद्य पुष्पमालासमुद्भवम् ।
कटेवा विपुष्कलं देवे वेशयेत्कर्ममण्टपे ।
वालुके शाययित्वा तु आशुष्कं लक्षयेत्तरि ।
अङ्गोपाङ्गप्रत्यङ्ग मानं निश्चित्य कल्पयेत् ।
यथा बेराङ्गदीर्घन्तु यथाश्मलायतं मतम् ।
मध्ये तु तत्प्रमाणस्य चतुर्भागैकविस्तृतम् ।
वंशदण्डनतं तस्य मूलेच्चाङ्गुलवर्जनात् ।
चतुरष्टाश्रवृत्ताभा नाभ्यन्तचतुरश्रकम् ।

हीत्यान्तमहस्ताग्राश्रं शेषं वृत्तं समाचरेत् ।
एवं वा समवृत्तं वा हाराशूलप्रयोजयेत् ।
बाहुपर्यन्त विस्तारं पञ्चभागैक हीनकम् ।
वक्षो दण्डायतं तस्य पञ्च भागे तु विस्तृतम् ।
अङ्गुलाद्यधिकं तारं तस्यार्धं बहुलं तथा ।
कटीतारस्य पञ्चांशं हीनन्तु कटिदण्डकम् ।
तद्दीर्घान्तं तदर्धन्तु तद् बहुलमिष्यते ।
वक्षोदण्ड कटीदण्डमायामन्तु द्विपार्श्वयोः ।
द्व्यङ्गुलैकाङ्गुलायामं तं वक्रं च शिखान्वितम् ।
द्विचतुष्षडष्ट दोर्दण्ड शिखा तद्योगमाचरेत् ।
हीत्याया द्व्यङ्गुलाधस्ताद्वक्षोदण्डार्धसीमकम् ।
नाभेः पञ्चाङ्गुलाधस्तात्कटिदण्डस्थितिर्भवेत् ।
P. 541 कटिदण्डशिखायान्तु त्र्यङ्गुलावधिवारवनम् ।
ऊरुद्वयोष्ठ मानन्तु आरोप्यायाममिष्यते ।
स्थानके चोत्तदायार्ध सममासनके भवेत् ।
तन्मध्यसुषिरं कृत्वा कटिदण्डशिखाद्वयोः ।
स्थानके जानुमानन्तु न सन्धिर्व विधीयते ।
जानुमानद्विभागस्य ऊरुजंघाद्वयोरपि ।
आरोप्ये ज्जानु · · प्रयच्छा मण्डलाकृति ।
मध्ये च्छिद्रा विजानीया द्दण्डाद्विर्धा शिखान्वितम् ।

6

जंघादण्डतलोच्चन्तु आरोप्यञ्च प्रयोजयेत् ।
ऊरुमध्यत्रिभागैकमूरुदण्डविशालकम् ।
पादहीनं तदर्धे तु जंघामूलं तथा भवेत् ।
तत्त्रिभागहीनं स्याज्जंघाग्रं तलदण्डकम् ।
अङ्गुलाधिकविस्तारं तलायामत्रिपादनुत् ।
द्विभागं तलदण्डस्य दीर्घं सुष्ट्दमध्यमम् ।
विशाले तु त्रियङ्गक . . दण्डवामतम् ।
अग्रं त्रियंशहीनं स्यात्प्रकोष्ठमूलं तथैव च ।
अर्धाङ्गुलाधिकं वापि प्रकोष्ठाग्रं तदर्धकम् ।
जानुवत्कोर्परं बाहुप्रकोष्ठयोरपि ये द्विहा ।
पार्श्वदण्डद्वयं पार्श्वद्वयोर्विंशस्य योजयेत् ।
एवं पुरुषमानं तु योजयेच्छूरकर्मणि ।
p.542 मध्योदरात्रिभागैकं मध्यदण्डस्य विस्तरम् ।
स्त्रीणान्तु वक्षदण्डस्य चायामं पार्श्वदण्डयोः ।
बाहुमूलार्धहीनं स्याद्धीरं शेषं तदर्धकम् ।
तारं तदर्धं बहुलं शिखा पूर्ववदाचरेत् ।
स्थान देविकाश स्थापयेच्छूलतास्मिन् शुभ्रे
द्विजाद्धातुरक्तो षाधिश्चाधिदर्भपा .
सर्वगन्धे शिलपाश्चालयौ निष्क्रान्त क्रमेण ।
इत्यागस्त्ये सकलाधिकारे दारुसंग्रहणशूलमान-
विधानो नाम नवमोऽध्यायः ॥

श्री

(38)

वेदात्रिपञ्चैकवसुत्रिभाग त्रिवेष्टकं कुन्दुरुकुङ्कुलञ्च ।
गलं तथा सर्जरसंच जातं क्रमेणभागैर्युतसूक्ष्मचूर्णैः ॥
प्रतोतलेभे निक्षिप्य पश्चाददक्षौद्रसमाहृ बन्धम् ।
रज्जुगन्धमिति वक्ष्ये पद्मपत्रस्य मूलवत् ।
नाभिदेशे तदूर्ध्वेतु स्तनद्वयात् मध्यगा ।
सुषुम्ना दक्षिणे वामे पिङ्गला चन्द्रसामीपे ।
एतैः पञ्चयवैस्तारैः त्रिवंत्रियुतरज्जुभिः ।
एषा नाटित्रयाणान्तु योगमग्रं मध्यमे भवेत् ।
एकाकारेण मूर्द्नान्त तिर्यग्जानादि दक्षिणे ।
नेत्रान्तं तत्र गन्धादि हृसिं जिह्वां तथा करैः ।
P. 543 पुरुषदक्षिणकर्णान्ते वामकर्णे यशस्विना ।
यवत्रयविशालेन दक्षिणामृतरज्जुना ।
तिर्यग्गता चतुर्णाटी अधोगन्ता त्रिधा भवेत्
अलम्बुषाच मेढ्रान्ते गन्तान्ते गुहाद्भवेत् ।
नाडिमध्यात्तु तन्मध्ये शंखनी तु चतुर्यवा ।
द्विपात्रेच त्रयाणान्तु योगं नाभिदेशाङ्गुलम् ।
अधस्तादुपस्थमूलं स्यात्प्रधान दशनाडिका ।
तेभ्यः प्रभिन्ननामानि नवयोष्टदशा भवेत् ।
विमला घोषणैः पूर्व अहसी तेजसी तथा ।
वालिनी भागिनी चेति मदन्ती रेसनी पुनम् ।

रसद्वागौच मङ्गङ्गी स्त्रयंशनीच . . . ।
. . . शिस्तारश्चप्राभिन्नाच . . . बहुधा स्मृता।
द्विसप्ता दिवसानान्तु . . . तेभ्यस्तथैव च।
श (ब्द) प्त स्पर्शपूर्णाच समवरसधारिणी।
पादहस्तेषु सर्वाङ्गे स्थिता ह्येताः प्रकीर्तिताः।
एते विभवविस्ताराः प्राभिन्नाबहुधा स्मृताः।
द्विसप्तादिरसद्रान्तु ते ह्यसंख्ये प्राभिन्नका।
अथवा विप्रतिमायास्तु अष्टविंशतिरिष्यते।
प्रधाननाडिकां सम्यक् कल्पयेद्य यथाबुधा।
अथ दोर्धा तिष्टनाडिभ्यां प्राभिन्ना ष्टाष्ट नाडिका।
544 तैर्वैष्टनैश्च सर्वाङ्गे कल्पयेन्नापि शूलका।
नालिकेरबल्ले चर्म सारतैलमुपोह्य च।
द्वयप्रमाणविस्ताररज्जुमापा . . . . ।
रज्जुद्वयन्तु सीग्राम्य शूलात्सद्रोपयेद्बलात्।
आसितरन्ध्रा रज्जुभ्यां बन्धनन्त्रतम्।
रज्जुभिः पूर्वमानैस्ताच्छिरमाग्रोपाबन्धयेत्।
नाभिमूलात्तु हृदयावसानेमध्यनाडिका।
सहनालं भवेत्पत्रमष्टपत्रं हि रज्जुना।
सङ्कल्प्य तस्य मध्यस्थासजीवस्थाद्रुमाहृतम्।
तत्रस्थान बीजमन्त्रं यद् बीजापक्रमन्नोपनम्।

९

॥ मृत्संस्कारम् ॥

मृत्संस्कारमानञ्च वक्ष्यते विधिनाधुना ।
शुद्धदेशे सु - - - ष्ट्या स्वादुतोयका ।
पुण्यतीर्थनदीयुक्तं दीर्घिकायां विशेषतः ।
तटाकेच मृदं श्रेष्ठं श्वेतं वा ताम्रमल्लकम् ।
कृष्णं वा पीतरक्तंवा संग्रहेः श्वेतयेत्पुनः ।
पत्रस्तम्पकवच्छाल्या चतुः क्षीरत्वगुद्भवेत् ।
खदिरार्जुनकाष्ठाद्यै सूद संयोज्य मर्दयेत् ।
पिण्डीकृतक्षामं यावत् संशोष्य - - तत्पुनः ।
त्रिभल्लैर्योषितैस्तोयैः मृद्धितं वा विशोषयेत् ।
P. 545 हस्तेरेखाङ्कितं पिण्डीमृत्तुपिण्डस्य सञ्ज्ञकम् ।
मानाङ्गुलेन तं भागं रुद्राङ्गुलस्य मिष्यते ।
प्रस्थचूर्णप्रमाणं तच्चूर्णयोगं प्रचक्षते ।
सिकताश्म शार्करपूर्णं मृच्चतुर्थञ्च संयुतम् ।
मर्दयेत्त्रिफलातोयैः दशांशं चाष्टसप्तके ।
निक्षिप्य यमवद्धमभाषजर्जरचूर्णकम् ।
मृत्वक्सङ्गेन संयुज्यं नालिकेरफलेन च
जलेन मर्दयेत्पश्चात्त्रिद्विरष्टाङ्गसंयुतम् ।
श्रीवेष्टं गुलगुल्वापि सर्जरस कुन्दुरुचूर्णैश्च दधिना ।
युज्य मर्दयेत् कटुगं त्रियवैर्माषं रयजानिचूर्णैश्च
तद्दशांशेन संयुतम् ।

मधुक्षीरं घृतं मध्ये पश्चात्पञ्चादशाङ्कुलम् ।
कापित्थबिल्वनिर्यासैश्चूर्णैस्तैलेन मर्दयेत् ।
अतसिस्नेहसंयुक्तं रुष्टं हरितालमेवच ।
चूर्णैः स्वलनकर्पूरागरुगोरोचनैस्तथा ।
तिंशद्भागसंयुक्तमतसि स्नेहेन मर्दयेत् ।
सौवर्णं राजतश्चूर्णं यथामानेन संयुतम् ।
हृदादि सस्यवर्णैक कुटिलावत हस्तलैः ।
उभयं तस्करमुद्रादि गोविषाणेनमदृशा ।
यथावातेन संगृह्य सर्वगन्धैस्समन्वितम् ।
P. 546 मधुवज्री कृष्णकाति कनीकवीर्यसेन प्रमर्दयेत् ।
जाङ्गलानपसंमिश्रे ज्ञानमुद्रे पथं वरम् ।
शूलादबाहैः प्रमाणान्त चतुरंशवि भाजिते ।
एवं द्व्यंश त्रिंशैश्च अनुरूपे मिश्रसागरे ।
शेषं कल्पन संपूर्य भूसन्तात सह वल्कलम् ।
तस्या . . . लूकसंभ्रितम् ।
शर्करं ग्राह्य विधिवत्प्रक्षाल सिकतोपमम् ।
चूर्णीकृत्याथ चूर्णेन त्रिफलोसित वारणम् ।
पिण्डुकत्वा तु संशोष्य पश्चाद्रोधासवारिणाम् ।
निर्याससारात्पञ्च गुणं पञ्चांशं षड्गुणं क्रमात् ।
स्वपापं सैक एवात्म जलं त्रिविधमिष्यते ।

॥

पेषयेत्स्वकल्क - - लेपयेत्पुरिम् ।
त्रियर्धं वेदपादार्धं गुणात्रिविधतोययुक् ।
दूर्वालपपक्षारामायां अस्य बन्धमजात्रिमा ।
अत्यर्ध्यपाद्ययेत्कृत्वा पुनस्तुच्छपेषणिभ्याश्च पेषयेत् ।
सयेन लिप्य सम्पूर्ण प्रमाणेनान्तं हि लक्षयेत् ।
बहुप्रमाण संलक्ष्यं कृत्वा गोपान्तु निर्णयम् ।
पश्चात्क्रमजलेनैव पादाग्वादं प्रयोजयेत् ।
तदूर्ध्वे कल्पमालोप्य शोष्य पश्चात्सुपेषयेत् ।
मण्डनाध्ये तदूर्ध्वे स मण्डयेल्लक्षणान्वितम् ।
P.547 पश्चाद्बन्धं प्रलिप्याथ शुक्लेपनमिष्यते ।

इत्यागस्त्ये सकलाधिकारे
बद्धलेपन रज्जुबन्ध मुत्कलसंस्कारक्रमविधि
दशमोऽध्यायः ॥

═

अथ वर्णस्य संस्कारं वक्ष्यते विधिनाधुना ।
सितपीतारुणं कृष्णं प्रथमं वेदभेदकम् ।
एकैकं बहुधा भेदैः श्वेतादीनां पृथक् पृथक् ।
मुक्तश्वेतश्च पक्षाणां शंखजं शर्करं सितम् ।
हरितालञ्च कुंकुष्ठ पृषन्त्सारा हि चूतजम् ।
दुग्धराक्षस्थसारञ्च मृत्तसारं हि रक्तकम् ।

श्यामपाषाणजं श्यामं राजावर्तस्य चूर्णकम् ।
एवं स्वभावभेदं स्यात्सङ्करं बहुधा भवेत् ।
लोके यथावर्णं योजयेद्वर्णयोगवित् ।
सौधे तालञ्च नीलञ्च हिङ्गुलं लक्षणं विना ।
मृल्लिप्तं वर्जयेद्यावत्पक्षापाषाणजं सिता ।
शाकं वा जलपादेषु बन्धभोगं हि योजयेत् ।
सन्धौ कल्पञ्च संस्कारमेकैकञ्च गुणं विदुः ।
वर्णानां बन्धयोगश्च कपित्थानिर्यासकं तथा ।
हीनाष्टकं वापि गोचं सारमाहिषचर्मवत् ।
एवमासारवदेषु गोमाहिषजमिष्यते ।
होमष्टं वा प्रयोगेषु कल्पयेच्च प्रयोगवित् ।
P. 548 त्रियर्धं वेदवेदार्धे पञ्चांशे तु प्रयोजयेत् ।
निर्यासपिण्डचूर्णं वा कोयं वर्णेषु योजयेत् ।
आस्ते पूर्वं प्रलिप्याथ पश्चात् पिण्डप्रलेपनम् ।
वर्तयेद्वर्तनाभे भैस्वर्णैरसारत्वक्सारसंयुतम् ।
श्वेतोपरि स्वर्णेन वर्तयेत्सौधजं दृढम् ।
अन्यानुत्तममार्गाणां भैरितं गुरुगोगतम् ।
चित्रार्थं चित्रसकलैः पद्दिततैर्यमित्यपाता ।
संयोगकरणे बहुवर्णयोगिभिः स्वर्णन्तु गुण
प्रभेदैः ताप्यान्तरै रविकृतं सकलसंपूज्यैः ।

इत्यागस्त्ये सकलाधिकारे
वर्णसंस्कारो नाम एकादशोऽध्यायः ॥

श्री.

सकलानान्तु सर्वेषां वक्ष्यते अक्षिमोचनम् ।
पञ्च सप्तदिनेभ्यो वा द्व्येकदिवसात्पुरात् ।
अक्षिमोचनमुद्दिश्य कर्तव्या चापलार्पणम् ।
विमानस्य पुरोभागे मण्डपे समलङ्कृते ।
वितानध्वजसंयुक्तं पुष्पमालावलम्बनम् ।
तन्मध्ये धान्यपीठन्तु हस्तं हस्तार्धमेव च ।
द्विहस्तन्तु समुत्सेधं हस्तार्धं वा षडङ्गुलम् ।
मध्यपीठे न्यसेत्तस्य पद्ममध्ये तु विन्यसेत् ।
नाल प्रमाणचतुरनवकोष्ठं सुकल्पयेत् ।
P. 549 कोष्ठमध्ये पुटे रत्नं विन्यसेते शिखोत्तमा ।
पद्मरागञ्च वैडूर्यं नीलं मरकतन्तथा ।
मौक्तिकं स्फटिकं चैव पुष्परागन्तथैव च ।
प्रवालवज्रमित्येते मध्य दक्षिणतो न्यसेत् ।
धातुबीजं न्यसेत्पश्चादञ्जनं हरितालकम् ।
श्याममानशिलावाररसन्नराष गैरिकम् ।
माक्षिकं विन्यसेद्धुत्वा विन्यसेच्छुभ्रदेशिके ।
नीलन्नीवारमुद्गञ्च यवसो यावकन्तथा ।
श्याम · कुशस्यञ्च प्रियङ्गुञ्च तथैव हि ।
बीजं स्वर्णेन कर्तव्यं विन्यसेन्मन्त्रपूर्वकम् ।
रत्नन्तु हृदयेनैव शिल्पमन्त्रेण धातुकम् ।

कवचेन तु बीजञ्च विन्यसेत्पीठमध्यमे ।
शिल्पी हृदयमन्त्रेण प्रतिमां शुभ्रमभ्रमे ।
आर्जवं लम्बसूत्रेण आलोध्यस्य पयोम्बुधा ।
पीठबन्धं जितं कृत्वा स्नानं सिकतचूर्णकम् ।
गोचर्म पट्टरत्नैश्च वस्त्रेणाच्छादयेत्पुरा ।
अक्षिमोक्षण निर्दिष्टदिनात्पूर्व दिने सुधीः ।
अधिवंशं प्रकुर्वीत आत्मानि ४ प्रदेशके ।
पूर्ववद्धान्यपीठेतु . देन्देवीं निधापयेत् ।
देवस्य वामभागेतु धान्यं पीठं पुरोक्तवत् ।
P.550 उपपीठं विना वापि विदूरे चण्डमेव वा ।
विन्यस्य तण्डुलेनैव तदूर्ध्वे कलशान्यसेत् ।
सूत्रैरावेष्टितान् श्वेतान् नूतनाम्बरवेष्टितान् ।
गन्ध पुष्पादिभिः पूज्य ब्रह्मादीनान्तु देवताः ।
तत्तत्स्वनाममन्त्रेण बलिं दत्वा यथाविधि ।
सुस्नातः प्राप्तभूताङ्गलुब्धो विलसमानसः ।
नवाम्बरं समादाय कृत्वैकेनोत्तरायकम् ।
कुम्भोदकैरभिषिच्य कृत्वा गन्धादिभिः क्रमात् ।
सर्वमङ्गलसंयुक्तं नृत्तगीतारवैस्सह ।
एवं सिच्येषु लाभ्यान्तु लेखयेन्नयनत्रयम् ।
पश्चात्तु तीक्ष्णशस्त्रेण मण्डलत्रयमुच्यते ।

वर्णयुक्ताश्रिते वेशे लिख्वा भेदक्रमं भवेत् ।
(मा) क्षीबमात्रन्तु सौवर्णमाक्षि कुम्भोदकेन च ।
आस्याहृत्वी भ्रमभजा देवेशार्चयेत् ।
आचार्य यजद्रष्ट्व्यामे समदयमे ।
चन्द्रादित्याग्निद्विजेन मंत्रेण मनसा स्मरन् ।
दृष्टमण्डलकमलया चामीकरसमाश्रितम् ।
सर्वं प्रदर्शयेत्पूर्वं पञ्चगव्यमतः परम् ।
धान्यराशि सवत्साङ्गं ब्रह्मणामपि दर्शयेत् ।
सर्वमा(शा)सुखावाप्ति निमित्तं किं न्यवाचयेत् ।
P.55 । मानस्य..भक्तस्य विभोस्ते शरणान्वितम् ।
उभौ सन्निहितौ भूत्वा यथाशक्त्यापवादितम् ।
आदिप्रभृति देवेश पूजां गृहाण सर्वदा ।
नमस्तेस्तु सुरेशान हीनाधिकसमप्रभ ।
कस्त्वां पूजयितुं शक्तो जय भक्त्या प्रपूजयेत् ।
एवं संप्रार्थ्य देवेशं नमस्कृत्वा कृते सुरे ।
शिल्पिभिस्सङ्कृतिं कृत्वा आचार्य . . मारभेत् ।
दृष्टिमोक्षणमुद्दिश्य द्रव्याण्यपि विशेषतः ।
सवत्सां गां सवस्त्राश्च सर्वाणि शिल्पिने ददे ।
वस्त्रैर्भूषणधान्यरत्नपशुभिस्सन्तोषिणः शिल्पिनः ।
कृत्वा द्यौ विधिवद्विमुच्य नयने निमीलिते शिल्पिभिः ।

आचार्यः सहशीर्षमन्त्र विधितः शान्ति वासाहिकं
कृत्वा देवनीभित्ति मनसा सुस्थापनं कारयेत् ।
इत्यागस्त्ये सकलाधिकारे
आक्षिमोक्षण विधानो नाम द्वादशोऽध्यायः ॥

श्री

Copied from the G.O. Mss. Library Madras.
(Ms. No. R. 5632-b)

चामुण्डीध्यानम्

Page 551 नमःशिवाय रूपाक्षी शङ्करीशकरीश्वरी ।
वेदवेदाङ्गरूपाक्षी स्थिता सूक्ष्मार्थकारिणी ।
घनस्तनवरनमितां कम्बु कर्णौ कृशाङ्गी
चामुण्डा कालकण्ठी प्रणयविरचितं भाति वीरा पुरस्तात् ।
कपालिनीं शूलधरां वरदाभयपाणिकाम् ।
P. 552 रक्तविस्रस्तोर्ध्वकेशीं करोटीनुतमस्तकाम् ।
शिरो मालोपवीतञ्च शापादूर्ध्वं कृशोदरीम् ।
निर्मांसव्यावृतमुखीं दीर्घजिह्वां त्रिलोचनीम् ।
व्याघ्रचर्माम्बरधरां भुजङ्गस्तनबन्धनाम् ।
कालीं कृशाञ्च कृष्णाञ्च वटवृक्षसमाश्रिताम् ।
सुदंष्ट्राञ्च करालञ्च चामुण्डीं गृध्रकोलिकाम् ।

— सदाशिवम् —

इन्दुनिभपञ्चमुखहस्तदशयुक्तं
शूलकरटङ्कमसि वज्रमभयं स्यात् ।
पाशमहुशाङ्कुशा मणिदहनवामे
श्वेतकमलासन सदा निबद्धरूपम् ॥

मनोन्मनी- वेणुनिभवेदकरवह्निनयनं स्यात्
पद्मवरदाभयजपाक्षवलय युक्तम् ।
पीनवसनाम्बरजटामकुटयुक्तं
श्वेतकमलासनि मनोन्मनि स्वरूपम् ॥

सदाशिवम् :—

शान्तं पद्मासनस्थं शशधरमकुटं पञ्चवक्त्रं त्रिणेत्रं
शूलं वज्रञ्च खड्गं परशुमभयं दक्षभागे वहन्तम् ।
नागं पाशञ्च घण्टामनलगणयुतं चाङ्कुशं वामभागे
नानालङ्कारयुक्तं स्फटिकमणिनिभं नौमि सादाख्यतत्वम् ॥
रणकर्णिकाज्वालमाये सम्पूर्णनिश्चामरैः
पूर्णपुष्पवकुलैकाशिकुशैरर्पितैः ।
नित्यं भानुसहस्रकोटिकिरणैः कालाग्निरुद्रं हरं
P. 553 तत्संहारकरं नमामि सततं पातालषष्ठमुखम् ॥

गौरी :—

आनीलामतिपीताम्बरधरामापूर्णदर्वीकरा-
माबद्धस्तनमण्डलावलयिनीमालोलनीलालकाम् ।
अन्नापूर्णसमर्पणोत्सुकतरलामानन्दयन्तीं जना
नन्नापूरितहेमपात्रसुभगामन्नेश्वरीं त्वां वृणे ॥

नायकः :— एकमुखवेदकरवृद्धस्वरूपं
कृष्णमृगगङ्गवरदाभयहस्तम् ।
लोचनत्रितयवस्त्रपरिधानं
सोमगुहगौरिसहसूनुमहमीडे ॥

பிள்ளையார் - कर्णोपरिष्टात्परिवक्रकान्तं
कण्ठादधस्ताद्धरभूतरूपम् ।
कुम्भोपरिष्टान्मकुटं करण्डं
लम्बोदरं लोहमिदं वदामि ॥

मैलारम् -

उद्यद्भानुमुखं नीलमेघनिभाङ्गं चित्राम्बरसंयुक्तं
चन्द्रभूषणं त्रिशूलासिकपालांशं हरिद्रातिलका-
ङ्कितं डमरुकं शक्तिसंयुक्तं ध्यायेन्मैलारमीश्वरम् ।

मूर्तास्त्रिवयो मौक्तिकजपं कर्णमुखैः पञ्चभिः
व्यक्तोरञ्जन ईशइन्दुमकुटे पूर्णेन्दुकोटिभ्रमम् ।
शूलात्तुबाण वज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशाभीतिकरोदधानममिताकल्पोज्वलं चिन्तयेत् ।

P. 554 अरुणकिरणवर्णं पद्महस्तं त्रिणेत्रं
मणिमयमकुटाद्यैः कुण्डलाभिर्विराजम् ।
कटकवलयहारैः नूपुरैः कल्पजातैः
दरभयवरहस्ताश्चिन्तयेत्सौरसिद्धिम् ॥

ईश्वरी :-

सिन्दूराभान्त्रिणेत्राममृतकलधरां शेखरारक्तवस्तां
पीनोत्तुङ्ग प्रवृद्धस्तनभरनमितां यौवनारम्भरूढाम् ।
नानालङ्कारदीप्तां सरसिजनिलयां बीजसङ्क्रान्तमूर्तिं
देवीं पाशाङ्कुशाभ्यामभयवरकरामम्बयोनिं नमामि ॥

ऊर्ध्वताण्डवम् :-

अथ वक्ष्ये विशेषेण नटेशध्यानमद्भुतम् ।
यद्रूपं भावयेल्लोके भवेच्छन्दकरं नृणाम् ।
परमाकाश मध्यस्थ मपस्मारोपरि स्थितम् ।
अष्टबाहुं त्रिणयनं सर्वाभरणभूषितम् ।
व्याघ्रचर्माम्बरधरं भस्मलेपितविग्रहम् ।
शुक्लयज्ञोपवीतञ्च भस्मतारं तथैव च ।
स्थितं वै दक्षिणं पादं वामपादं तदूर्ध्वकम् ।
डमरुं दक्षिणे हस्ते वामहस्तेन . . न्तथा ।
अभयं दक्षिणे हस्ते पाशं वै वरदं वामहस्तके ।
त्रिशूलं दक्षिणे हस्ते वामपादन्तदाग्रगम् ।
फणीं दक्षिणहस्ते वा वामे तु कटिसंस्थितम् ।
P. 555 हरिब्रह्मादि चन्द्रार्क नन्दिकेश्वरसेवितम् ।

P.555 आनन्दताण्डवम् :-

ध्यायेत्कैलासगौरीं प्रसृतागिरिजटार्धेन्दुदुग्धूरगङ्गा-
साव्ये पिण्डीकमोन्येकरकलितभुजंकानलोस्सव्यपादम् ।
न्यस्त्वाभ (प) स्मारमृष्टेह्यपरपदनटं तं त्रिणेत्रं नटेशं
व्याघ्रत्वकसत्त्ववस्त्रं श्रवणयुगवनं चांघ्रिकाभद्र ध्यात ।

ईश्वरी :-

नानालङ्कारदेहीं नटकुलपरपीठासाग्निना नागहारी
नादब्रह्मानुघोषी धनशशिरविणानारदादि प्रपूजम् ।
नाहङ्कारी नकारी नररुजिनवृह्णी कदमापीठवासी
तस्मै नग्नावतारी न भवति न दिवा ह्री नमस्ते ॥

माहेन्द्री मातृरूपी मधुरतवासी मन्त्रमूर्ति मातङ्गी
मश्व नू मांसभक्षी मममुरि हरी मायवी मारुतात्मा ।
मायादेवी महोग्री मरणजरहरी मातृकासप्तमूर्ती
मात्रेयं सौत्ररूपी माहेष धनुष्कयी मातृकां ओं नमस्ते ।

श्रीमूर्ति सिद्धयोगी शिवकरवदनीं सिन्धुपुत्रीं शिवानी
शिक्षाप्ती शीलवर्ती शिरसि शिशुरशुनाधकरी कर्तरीति ।
सिद्धार्थी शुद्धरूपी शिव शिवमन्त्राक्षार श्रेष्ठकर्णमाली
P.556 वागीशी वाग्यवृद्धी धन ह् श्रीवृद्धलक्ष्मी नमस्ते ॥

वामार्धे वामदेवी वरमुनिजननी वासुकीसारिकारी
शीघ्रं सम्पत्करी सी - - - - भगवानन्दकारी ।
वैकुण्ठो राजलक्ष्मी वसुमतिजननीवासवादित्यनाथी
वश्री वाक्यप्रसन्ना वरमुनिजननी वामनेत्री नमस्ते ॥
यक्षेन्द्री यक्षकन्या यमशिर भरणीयन्त्रमन्त्राक्षराङ्गी
यज्ञाङ्गी यज्ञरूपी यम.. करी यज्ञसंहारकारी ।
यन्त्राब्धिं पञ्चवर्णां स्मरजननिधनां पात्रसुनेत्री
यजुरुक्क्रीडा सामवेदीयशाकरवदनी यन्त्रमूर्ती नमस्ते ॥
इदं पञ्चाक्षरस्तोत्रं यः पठेद्देवि सन्निधौ ।
भूतले च सुखं भूत्वा शिवलोकं प्रयास्यति ॥
॥ इति पञ्चाक्षरस्तोत्रं संपूर्णम् ॥

श्री

पदविन्यासम् :-
आयामे विंशतिं कृत्वा दशांशं शङ्कुरस्य तु ।
नवांशं ब्रह्मशैर्युक्तमष्टमं विष्णुमुच्यते ।
सप्तमं षण्मुखस्थानं द्विभागं शक्तिरुच्यते ।
एकभाग पदे चैव पैशाचे भद्रकालिका ।
॥ इति पदविन्यासलक्षणपटलः ॥

श्री

धातृबेरम् :—

अतः परं प्रवक्ष्यामि धातृबेरस्य लक्षणम् ।
रौप्यजाम्बूनदञ्चैव लोहरूपं यमन्तथा ।
यथासमभवेद्दि .. बेरं कुर्याद्विशेषतः ।
P. 557 प्रमाणं द्विविधं प्रोक्तमुत्तमादि विशेषतः ।
मूलबेरन्तदर्धन्तु तद्बाहुसदृशन्तथा ।
मूलबेरात्समं .. बेरन्तु त्रिविधं भवेत् ।
मूलबेरात्तदर्धन्तु निर्मितानुत्तमोत्तमैः ।
नानाशास्त्रप्रयोक्तव्यं तदर्धं निर्मितं तथा ।
चतुर्भुजन्त्रिणेत्रञ्च जटामकुटशोभितम् ।
पाशं त्रिशूलं पात्रञ्च धारयित्वा समाहितः ।
वरयाभयहस्तन्तु चतुर्भुजविधानतः ।
महोत्सवप्रयोगं स्यादुत्तमं बेररूपकम् ।
तस्मात्सर्वप्रदं कुर्याद्वित्तशाठ्यन्न कारयेत् ।
शिल्पिशास्त्रोक्तविधिना मुक्तिरूढाकृतिन्तथा ।
इदं कल्पोक्तविधिना धात्रा बेरविशेषतः ।

इति ब्रह्मयामलम् ॥

श्री.

Page 557 स्कन्दः —

डाडिमीपुष्पसङ्काशं कुञ्जाभं कुङ्कुमाकृति ।
षड्वक्त्रसहितं देवं द्वादशाक्षस्य यौवनम् ।
चतुर्भुजयुतं देवं कटिबन्धाभयहस्तकम् ।
कमण्डल्वाक्षधरञ्चैव करण्डमकुटोज्ज्वलम् ।
हारकेयूरसंयुक्तं कटिसूत्रोदरबन्धनम् ।
यज्ञोपवीतसंयुक्तं छन्नवीरसमायुतम् ।
P. 558 पादनूपुरसंयुक्तं सर्वाभरणभूषितम् ।
सर्वलक्षणसंयुक्तं कुमारं शङ्करात्मजम् ।
भवानीभजवल्लीच सुयुक्तं सुगुणप्रियम् ।
इत्थं रूपं यजेन्नित्यं सर्वलोकहितावहम् ।
चतुर्भुजं द्विनेत्रञ्च कर्णयोः पित्रापिण्डधृत ।
नक्रकुण्डलसंयुक्तं समीपे शक्तिकाद्वयम् ।
दक्षे वामकरे चैव साक्षमाला कमण्डलुम् ।
वरदाभययुक्तो वा कटिसूत्रसमन्वितम् ।
मयूरवाहसंयुक्तोऽप्यथवा युक्तपत्रकः ।
शक्तचेकया युतो वापि तयोर्लक्षणमुच्यते ।
चतुर्भुजो बालवेषः स्कन्दश्च कनकप्रभः ।
शक्तिकुक्कुटहस्तश्च वरदाभयसमन्वितम् ।
विजयं विजयाकारं वैभवं विभवेन तु ।

~~p.557~~ स्कन्दो दिशतु मे नित्यं कनकापुरिनायकः ।
कुमारं वरदं वन्दे कुमारीतनुर्भुवम् ।
अम्बिकाहृदयं वन्दे लम्बोदरवरानुजम् ।

षण्मुखम् -

विद्रुमनिभं द्विदशहस्तं रसवक्त्रं शक्तिशरखड्ग-
मभयध्वजगता . वामकरश्चापकुलिशचक्रटक-
स्फटयशूलवरपङ्कज सुषण्मुखस्वरूपम् ।

p.559 वरदमङ्कुशध्वजेन कटकचापवज्रमभयपाश-
चक्रखड्गमुसलिशक्तिमन्महम् . द्विदशपाणि भक्त-
दानमरुणकोटिसन्निभं भजततारामित्र भवविनाश-
कारणम् ।

सिन्दूरारुणकुन्दमिन्दुवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्थसौख्यप्रदम् ।
हस्ताब्जाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

द्विभुजश्च द्विनेत्रश्च सुब्रह्मण्यः सुसुन्दरः ।
पद्मधृक सव्यपाणिस्तु इतरेतरध्वृक्करः ।

बालरूपः प्रतिष्ठाप्यो ग्रामस्यैवाभिवृद्धये ।
द्विहस्तो यज्ञसूत्राढ्यः सशिखः सत्रिमेखलः ।
कौपीनदण्डधृक् सव्यपाणिः कटाश्रितः परम् ।
स्थापयेद्देवतास्कन्दं पर्वतेषु वनादिषु ।
द्विनेत्रो द्विभुजः शान्तः पद्मचारुकराम्बुजः ।
लम्बमानकरेणैव श्यामरत्नसमप्रभः ।
भवानी गजवल्लीति
द्विनेत्रे द्विभुजे शान्ते पद्मचारुकराम्बुजे ।
लम्बमानकरेणैव श्यामरत्नसमप्रभे ।
भवानी गजवल्लीति नामकीर्तनसुन्दरे ।

P. 560

इत्थं लक्षणसंयुक्तो ग्रामे वा नगरेऽपि वा ।
षडाननश्च षड्बाहुरेकश्रोत्रेक्षणान्वितः ।
षट्कर्णश्च स्वकर्णो वा प्रतिमौलिभिरन्वितः ।
सशक्तिस्साभयस्सासिस्साक्षमालास कुक्कुटः ।
सखेटकः स्वयं स्थाप्यो वृत्तये वकुनादिके ।
रक्ताम्बरसमायुक्तो बालचन्द्रसमप्रभः ।
करण्डमकुटोपेतो हस्तद्वादशगस्तु वा ।
शक्तिश्च मुसलं खड्गं चक्रं वाशाभये वहन् ।
दक्षिणे दक्षिणं वज्रं कार्मुकं खेटकं तथा ।

मयूरञ्च ध्वजश्चैव साङ्कुशं वारमावहन् ।
सोपवीतो मयूरस्तु शक्तिद्वयसमायुतः ।
ग्रामादौ स्थापनो योग्यं प्रासादादौ सिद्धे ।
एवमेवं विधं स्कन्दं भागविस्तारभेदतः ।
धर्मश्चार्थश्च कामश्च कामश्च नरायणम् ।
येन विद्यते स्तोत्रं तद्विघ्नराजस्य कथ्यते ।
धर्मश्चार्थश्च कामश्च नायनं येन विद्यते ।
स्तोत्रं तद्विघ्नराजस्य कथ्यते षोडशात्मनः ।
प्रथमं बालविघ्नेशं द्वितीयं तरुणं भवेत् ।
तृतीयं भक्तिविघ्नेशं चतुर्थं क्षिप्रदायिनम् ।
चतुर्थं वीरविघ्नेशं पञ्चमं शक्तिविघ्नकम् ।
p. 56 । षष्ठं ध्वजगणाधिपं सप्तमं पिङ्गलन्तथा ।
सप्तमं पिङ्गलं देवमष्टमोच्छिष्टनायकम् ।
नवमं क्षिप्रविघ्नेशं दशमं क्षिप्रदायिनम् ।
एकादशन्तु हेरम्बं द्वादशन्तु लक्ष्मीपतिम् ।
त्रयोदशं महाविघ्नं भुवनेशं चतुर्दशम् ।
पञ्चादशन्तु नृत्ताख्यं षोडशन्तु गणेश्वरम् ।
गणेशं षोडशं नित्यं प्रयतः प्रातरुत्थितः ।
संस्मरेत्सर्वकुशलं संप्रयाति न संशयः ।
प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कन्द एव च ।

अग्नेर्भवस्तृतीयः स्यात्स्वाहायश्च चतुर्थकः ।
गाङ्गेयः पञ्चमः प्रोक्तः षष्ठश्शरवणोद्भवः ।
सप्तमः कार्तिकेयः स्यात्कुमारश्चाष्टमः स्मृतः ।
नवमः षण्मुखः प्रोक्तस्तारकारिस्ततो दश ।
सेनान्येकादशश्चैव गुहो द्वादश एव च ।
त्रयोदशो ब्रह्मचारी शिव . . श्च चतुर्दशः ।
क्रौञ्चभित्पञ्चदशकः षोडशः शिखिवाहनः ।
षोडशस्कन्द [illegible] ।

अविकट कृत्तिकाद्याम् परताद्या मखादयः
सप्तानन जभुजगमैत्रताद्याग स्तश्चलास्त -
विष्टाद्या पञ्चाननं गणपतेस्तु मुखं मुखेन
P. 562 पञ्चाननं गणपतेस्तु मुखं मुखेन साधर्द्धिकेन
चतुरंशरणन्तु शेषम् । विस्तार्थ तच्च चरणेन
समञ्च युक्त्या शेषं नयेत मतिमान् गलमप्रकाशम् ।
पुरातनं वान्यतनं मुद्दिश्याकृत बेरकम् ।
शिलामयन्तु तद्बेर (मन्यदेशेतु) स्थापयेत्तु विधीयते ।
सर्वमंगण हानिः स्याज्जयमानो विनश्यति ।
तस्मात्सर्वप्रयत्नेन पूर्वं निश्चित्य मन्दिरे ।
अलक्षणकृतं बेरं त्यजेद् ग्रामस्य बाह्यके ।
स्वस्थानन्तु परित्या स्थानान्यस्थापयेद्यदि ।

मण्डलाधिपती राजा स्थापकेन विनश्यति ।

बलिपीठम् :—

प्रासादस्य तु विस्तारं यत्तद्दण्डमिहोच्यते ।
मूलहर्म्यं समारभ्य षडष्टौ दण्डमानता ।
दशद्वादश दण्डो वा मनुदण्डावसानके ।
शेषमष्टानिशौ वापि महापीठं प्रकल्पयेत् ।
अथवान्य प्रकारेण पीठस्थानं प्रकल्पयेत् ।
तृतीयो वा चतुष्पञ्च साले ग्राद्धाममदयमे ।
महापीठं प्रकर्तव्यं तस्य लक्षणमुच्यते ।
मूलधानन्तु द्वारोच्चं उत्तमं पीठविस्तृतम् ।
त्रिपादं मदयमं प्रोक्तं द्वारतुङ्गार्धकन्यसम् ।
शुद्धद्वारस्य विस्तारं कन्यसं पीठमुच्यते ।
P.563 द्विगुणं मदयमं प्रोक्तं त्रिगुणं श्रेष्ठमुच्यते ।
हर्म्ये वा व्योम हस्तन्तु अधमं पीठविस्तृतम् ।
द्विहस्तं मदयमं प्रोक्तं त्रिहस्तं श्रेष्ठमुच्यते ।
तद्विस्तारसमं तुङ्गं कृत्वा चैवाष्टविंशतिः ।
उपानोच्चं द्विभागं स्यात् षडंशं जगती भवेत् ।
कुमुदोच्चन्तु पञ्चांशं कम्पमेकांशमुच्यते ।
वेदांशं खण्डमानन्तु ऊर्ध्वकम्पं शिवांशकम् ।
महापद्मगुणांशन्तु द्विगुणन्तु विशेषतः ।

14

वेदांशं पद्मतुङ्गन्तु द्विभागं कर्णिकोदयम् ।
अथवा कर्णिकोत्सेधं गुणांशं द्विजसत्तम ।
पद्माच्चं पञ्चभागन्तु महापट्टि द्विभागिकम् ।
उपानोच्चं शिवांशेन शेषं पूर्ववदाचरेत् ।
अथ पीठोदयश्चैव विप्र धारा यथाकुरु ।
तदूर्ध्वे पद्मतुङ्गन्तु पीठोच्चे द्व्यंशमुच्यते ।
अधिष्ठानोक्तमार्गेण वेशं निष्क्रान्तमाचरेत् ।

ईश्वरी प्रतिष्ठास्थलम् –

ग्रामादौ शिव हर्म्ये तु अष्टदिक्ष्वन्तरालके
गौरी प्रतिष्ठा कर्तव्या इष्टदेशे मनोरमे ।

अम्बिका : —

उद्यद्भास्वत्स्वभावां विततजपाबिन्दुखण्डावनद्धां
ज्योतिर्मौलिं त्रिणेत्रां विविधमणिलसत्कुण्डलां पद्मकाञ्चीम् ।
हाराग्रैवेयकाञ्चीगुणमणिवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशाङ्कुशेष्टामभयकरवरामम्बिकां तां नमामि ।

पाशाङ्कुशाभयवरद हस्तधारि-
पीताम्बरी कनककुण्डल भूषिताङ्गी ।
आषोडशाकार कलाकल इन्दुमौली
एकाक्षरी त्रिभुवनाधिपतिं नमामि ॥

संवर्ताग्नितटित्प्रदीप्तकनकप्रस्पर्धितेजोरुणं बालेन्दुद्युति
गम्भीरध्वनिमिश्रितोग्रदहनप्रोद्भासिबिम्बाधरम्।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः॥

कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणं
गम्भीरान्धतमिस्रतोग्रदशनप्रोद्भासिदंष्ट्राङ्कुरम्।
सर्पप्रोतकपालशुक्तिशकलव्याकीर्णताशेखरं
वन्दे दक्षिणमीश्वरस्य कुटिलं भ्रूभङ्गरौद्रं मुखम्॥

प्रालेयाचलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम्।
ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभि-
P. 565 वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम्॥

गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम्।
स्निग्धं बिम्बफलाधरप्रहसितं नीलालकालङ्कृतं
वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम्॥

व्यक्ताव्यक्तनिरूपितश्च परमं षट्त्रिंशतत्वाधिकं
तस्मादुज्वलतत्वमक्षय(र)मिति ध्येयं सदा योगिभिः।
वन्दे तामसवर्जितं त्रिणयनं सूक्ष्मादि(ति)सूक्ष्मं परं
वन्दे पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम्॥

शान्तं यो वै एतानि पञ्च वदनानि भवेत्वभ्यादय-
कीर्तयन्ति मनुजाः। सततं प्रयाते संसारसागर-
पयस्यवतीर्य भारं गच्छन्ति ये शिवपुरं रुचिरैः
विमानैः।

रघुनाथः :-

सीतालङ्कृतवामाङ्गं द्विभुजान्तरलोचनम्।
वामहस्तेन सीता(यामपश्च) स्पृगशान्तस्तनमण्डलम्।
ज्ञानमुद्रायुतेनान्येनान्वितं लोकसुन्दरम्।
धनुर्द्वययुते नाथ लक्ष्मणेन सुशोभितम्।
कोटिकन्दर्पसङ्काशं राघवं करुणाकरम्।
P. 566 उपविष्टं पद्ममध्ये वीरासनमनोहरम्।
हनुत्सेवितश्चाग्रे कुर्या -
பன்னிரண்டு ஆழ்வார்களுக்கும் பெயர் -
भूतं सरश्च महदाह्वय भट्टनाथ
श्रीभक्तिसार कुलशेखर योगिवाहान्।

भक्तांघ्रिरेणुपरकालयतीन्द्रमिश्रान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥
நம்பெருமாளுக்குப் பெயர்.

ध्यानम् -

काषायशोभि कमनीय शिखान्यवेष-
दण्डत्रयोज्ज्वलतरं विमलोपवीतम् ।
. . . . . मुल्लसदूर्ध्वपुण्ड्रं
रूपं ममास्तु यतिराज दृशोस्तवाग्रे ॥

ஜாநவதான்.

प्रह्लादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीषणाद्यान् ।
रुक्माङ्गदार्जुनवसिष्ठवालिविभीषणादीन्
पुण्यानिमान् परमभागवतान् स्मरामि ॥

ஸ்ரீ ஜாநவத்திலே அத்யாத்ம ராமாயணத்திலே ஸ்ரீமத்பாகவதத்திலே
யதிராஜவைபவத்திலே ஸ்ரீவைஷ்ணவர்களுக்கு நித்யானுஸந்தானமாய்
பட்ட ஸ்லோகங்களும் உதாஹரணம்

नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने
. . . प्रशान्ताय कूटस्थाय स्वरोचिषे ।
567 इत्यादि नारायणं प्रति . . रकारे बहुशो दृश्यते ।
तत्रैव सप्तमे ध्वर्युणो हविष्टाय यजमानो विशांपते ।
यथा विशुद्धया दध्यौ तदा प्रादुरभूद्धरिः ।

18

इत्यारभ्य —

तमुपागतमालक्ष्य सर्वे सुरगणादयः ।
प्रणेमुस्सहसोत्थाय ब्रह्मेन्द्रक्षोणनायकाः ।
सतेजसा हतारुक्च स्कन्धाजिह्माः ससाध्वसाः ।
मूर्ध्नाञ्जलिपुटा भूत्वा उपतस्थुरधोक्षजम् ।
तत्रैव तस्मिन्नेव स्कन्धे षष्ठेऽध्याये —

सदोपलब्ध्यागतमात्मयोनिं
सुरासुरैरभिवन्दितांघ्रिम् ।
उत्थाय चक्रे शिरसाभिवादनं
महत्तमः कस्य यथैव विष्णोः ॥

श्रीवैखानसे ஜ்ஞானகாண்டே [illegible] அத்யாயே —

तस्मद्ब्रह्मा च रुद्रोन्यो देवाश्चेन्द्रादयो विदुः ।
नारायणं महादेवं विष्णुं सर्वेश्वरं हरम् ।
परात्परतरं नित्यमर्चयन्ति नमन्ति ते ।

— விஷ்ணு தல உயரத்தை 23 கூறு பண்ணி
கர்ண கூபவைத்த உயரத்தை பண்ணவே.
அதிஷ்டானத்தை 18 கூறு செய்து கபோதம் ௨.
கால் கிளம் ரு ௨, கர்ண கூட உயரத்தை
11 பண்ணி அம்சத்திலே கண்ட ஐசம்பங்கு
கபோதம். க௯. கால் கிளம். ரு. கபோதம் கவ.

(66)

P.568 வேதிகை-க. ஊர்த்வ உயரத்தை ரு-க. பண்ணி
கபோதம் க௭. கால்கண்டம் 29. கபோதம் கவ. கழுத்து
கபோதம் க. ஆகக்கூடு. 10. கபோதம். கஎ. கால்
கண்டம். 7 கபோதம். க. ஜாலி. க. ஶிவரம். ரு.
ஜாலி. க. ஆகக்கூடு 28. கழுத்து. க. ஸ்தூபம்
37. ஶிவரம் 3. அதிஷ்டானம். 2. ஜாலி. கவ.
கால்கண்டம். 4. ஆகக்கூடு. கக. ஸ்தூபம். 2.
வேதிகை. க. கழுத்து. 2. அயிஷ்டானம் ஶிவரம். 4.
ஜாலி. 2. ஆக 31. ஊர்த்வம் வைத்த உயரத்தை
16. அயிஷ்டானம் க2 காலுயரம். ரு. ஸ்தூபம்
க2 அயிஷ்டானம். 2. காலுயரம். 2. ஸ்தூபம்
ஐ. அயிஷ்டானம். ஐ. வேதிகை. வ. கழுத்து. கவ.
ஸ்தூபி. கவ. ஊர்த்வ உயரத்தை. 16. பண்ணி. அயிஷ்டானம்
கஐ. கால்கண்டம். 2. ஸ்தூபம் அயிஷ்டானம். 9. உபவீதம். 7.
காலுயரம் ஸ்தூபம். அ. வேதிகை. க. கழுத்து. க.
ஶிகரம் 2. ஜாலி. 2.

पञ्चवक्त्रं महावीरं कालानलसमप्रभम् ।
अजाण्डमालिनं रौद्रं कण्ठहारोपशोभितम् ।
सर्पयज्ञोपवीतञ्च नानालङ्कारशोभितम् ।
चन्द्रमौलिं नीलकण्ठं प्रतिवक्त्रं त्रिणेत्रकम् ।

भुजैः परिघसङ्काशैः दशभिश्चोपशोभितम् ।
अक्षसूत्रं गदापद्मं शंखगोक्षीरसन्निभम् ।
धनुश्च इन्द्रगोपौ च चन्द्राभश्चन्द्रवर्णकम् ।
पूर्वादिचोत्तरान्तश्च ऊर्ध्वाद्यं सर्ववर्णकम् ।
P. 569 एवमग्रे हरिं ध्यायेत्सर्वसिद्धिकरं भवेत् ।

आपदुद्धारणम् —

उद्यद्भास्करसन्निभं त्रिणयनं बालेन्दुपं कन्दलं
सूक्ष्मादण्डकपालपाणियुगलं ताटङ्ककर्णद्वयम् ।
कट्याबन्धमणिद्वयं . . जंघान्तरक्वणत्
घण्टादामकृतोपवीतमनिशं नौम्यापदुद्धारणम् ॥

चामुण्डाध्यानम् —

सा सर्वकामिके प्रोक्ता प्रतिष्ठा सर्वदेहिनाम् ।
चामुण्डा मध्यमे स्थाप्य प्रतिष्ठेयं प्रजाकरी ।
क्रमासनश्च योगश्च शान्तं वीरासनं क्रमात् ।
अधिष्ठानांश दोर्दण्डद्विषं षोडशबाहुकैः ।
चामुण्डां कारयेद्धुत्वा दारुकासुरमर्दिनीम् ।
नृत्तं वा युक्तितः कुर्यादष्टबाहुसमन्वितम् ।
सन्ध्यानृत्तसमीपे वा सन्ध्यानृत्तं यथा भवेत् ।

காளி அஷ்டபுஜத்திற்கு த்யானம் —

पाशं खड्गं कपालं परिघमपि भुजैर्वामकैरूर्ध्वमुद्रां
शूलं खड्गं महान्तं डमरुकपरिघं दक्षदोर्भिश्चतुर्भिः ।
न्यग्रोधारण्यवासां निगमकृतपदामेकनृत्तप्रमोदां
P.570 देवीं दंष्ट्राकरालां धृतविधुशिखरां भद्रकालीं प्रपद्ये ॥
कपालिनीं शूलधरां वरदाभयपाणिकाम् ।
रक्तस्रस्तोर्ध्वकेशाञ्च करोटीकृतसमन्विताम् ।
शिरोमालोपवीताञ्च आपादूर्ध्वां कृशोदरीम् ।
निर्मांसव्यावृतमुखीं दीर्घजिह्वां त्रिलोचनाम् ।
व्याघ्रचर्माम्बरधरां भुजङ्गस्तनबन्धनाम् ।
कालीं कृशाङ्गीं कृष्णाङ्गीं वटवृक्षसमाश्रिताम् ।
सदंष्ट्राञ्च करालाञ्च चामुण्डीं गृध्रकेलिकाम् ।

चामुण्डीलक्षणम् ।

चामुण्डा चण्डरूपन्तु ध्यानार्थमिह कथ्यते ।
ध्यानवैशिष्ट्यसिद्ध्यर्थं भवतामपि निर्मितम् ।
एकास्य कृष्णवर्णञ्च ऊर्ध्वकेशं सुदंष्ट्रकम् ।
चामुण्डा चण्डरूपेण दारुकाण्डेन संस्थितम् ।
वेतालञ्चैव खड्गञ्च डमरुञ्च त्रिशूलकम् ।
कपालञ्चैव घण्टाञ्च फलकानागधारिणीम् ।
दिव्याम्बरधराञ्चैव दिव्यपुष्पैरलङ्कृताम् ।

२२

चामीकरञ्च भूषयञ्च शिरोमालाविभूषितम् ।
किङ्किणीमालया भूष्यं पादनूपुरसंयुतम् ।
चामुण्डा चण्डरूपेण अट्टहाससमन्वितम् ।
प्रेतस्थाननिवासा च प्रेताशी सततं प्रिया ।
p. 57। भूतप्रेतपिशाचञ्च सततं सेवितं तथा ।
आसवञ्च सदाप्रेयमन्नपूर्णितलोचनम् ।
एवं रूपं स्मरेन्नित्यमर्चये देशिकोत्तमः ।
इति ब्रह्मयामले
शुद्धाभेद चामुण्डीध्यानपटलः
पञ्चमोऽध्यायः ॥

शेषभाष्य एकतलम्

Page. 571 एकादि पञ्च भूम्यन्तं तारोत्सेधस्य लक्षणम् ।
द्वित्रिहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ।
त्रिद्विपङ्क्ति कराढ्यान्तं षण्मानञ्चाल्पहर्म्यके ।
त्रिद्विहस्तनवाष्टान्तं चतुर्मानञ्चैकभूमिके ।
चतुष्पञ्च कराद्यात्रि मानञ्चाष्टनवान्तकम् ।
त्रितलस्य तु पञ्चार सैरत्निभ्च पञ्च सूः ।
त्रितलस्य ताते प्रोक्तं षट्सप्तास्य करादिकान् ।
त्रिमानं स्याच्चतुर्भूमञ्चतुर्मानं पञ्चभूमिके ।
एकादि पञ्च भूम्यन्तमल्पहर्म्या ताते क्रमात् ।
विस्तारात्सार्धपादेन द्विगुणा द्विगुणन्तु वा ।
विस्तारा द्विगुणात्पाद मर्धाधिकसमानकैः ।
विस्तारद्विगुणाद्धस्ताद्धीनाधिक्यः क्रमेण वा ।
विस्तारात्सप्तषड्भञ्च चतुर्भागं त्रिभाजिते ।
दशान्नवाष्टसप्तं तु शान्तिकादि शिरोदयम् ।
P. 572 शान्तिकं पौष्टिकञ्चैव मद्भुतं सार्वकामिकम् ।
भित्तिस्तम्भस्य बाह्यं वा मध्यमभ्यन्तरं ताते ।
पादुकादि शिरोच्चं वा कोचित्स्तूप्यन्तमुन्नतम् ।
अधिष्ठानादधस्सोपपीठं तु ङ्गान्यथोदयम् ।
शोभार्थमुन्नतार्धञ्च बालार्धं वा शतं क्रमात् ।
तारे सप्तविभागं स्याद्द्वित्रिभागैकभद्रकम् ।

नवभागश्चतुर्भागं पञ्च भाग द्विभागिकम् ।
त्रिभागे चैकभागं वा मध्यभद्रं विधीयते ।
आतोत्सेधविमानेषु द्विहिवांशं विभाजिते ।
सपादाद्ध्यंशकाधारं शरांशश्चरणोदयम् ।
त्रियंशं प्रस्तरोत्सेधं पादार्धांशं . . कंगलम् ।
सत्रिभागचतुर्भागं शिरश्शेषं शिखोदयम् ।
विस्तारे चतुरंशांश माधिष्ठानोच्छ्रयं भवेत् ।
द्व्यंशन्तलिपोत्सेधमेकांशं प्रस्तरोदयम् ।
ग्रीवमंशोदयं द्व्यंशं शिखरोच्चं शिखांशकम् ।
उच्छ्रये दशभागेतु सपादांशं तलोदयम् ।
सत्रिपादद्वयं पादं . . अंशं प्रस्तरोदयम् ।
सपादद्व्यंशकं ग्रीवं सत्रिपादद्वयं घनम् ।
शेषन्तु स्तूपिकोत्सेधमुत्सेधं षोडशांशकम् ।
तलेन द्व्यंशकश्चार्ध वेदांशश्चाद्रिकोदयम् ।
P. 573 सार्धमंशोदयं मञ्चं द्व्यंशेन गलोदयम् ।
शिखरश्चार्धवेदांशं सार्धांशं स्तूपिकोदयम् ।
एवमेकतलं प्रोक्तं पञ्चधा परिकीर्तितम् ।
त्रिचतुष्पञ्च षड्भागं सप्तभागमेकतलं क्रमात् ।
मानसूत्राद् बहिः कूटशालानां निर्गमं भवेत् ।
मानं स्याद्देशनं कुर्यान्न कर्तव्यं कदाचरेत् ।

सुभद्रं भद्रमंशं वा सादेकालितिदण्डकम् ।
निर्गमं मध्यभद्रेतु नीडं वा तोरणं बुधाः ।
कर्णे कर्णे च कूटे वा न कूटं स्यात्प्रयोजयेत् ।
अग्रतो मण्टपं कुर्यात्प्रासाद समविस्तृतम् ।
अग्रं वापि त्रिपादं वा मुखमण्टपमिष्यते ।
सपादं सार्धपादेन द्विगुणं द्विगुणन्तु वा ।
समन्तान्मण्टपं कुर्यात्सान्तरालसवेशनम् ।
युग्मस्तम्भसमायुक्तं मध्ये कुम्भ तला (लता) न्वितम् ।
सार्धहस्ताद्विहस्तं वा प्रासादस्यांशमेव वा ।
अन्तरालस्य विस्तारं द्वित्रिदण्डस्य वेशनम् ।
सावकाशान्तरालं चेद्वित्रिहस्तोन्तरन्तु वा ।
पार्श्वे सोपानसंयुक्तं हस्ति हस्तविभूषितम् ।
द्वारार्धं जालकार्धं वा भित्तेर्वा समलङ्कृतम् ।
अग्रस्य मण्टपाद्बाह्ये अन्तरालं प्रयोजयेत् ।
P. 574 अन्तरालस्य बाह्ये तु स्थापनं मण्टपं कुरु ।
तत्तत्प्रमाणसंयुक्तं मानं छेद्यं न कारयेत् ।
विस्तारे दशमन्ताष्टसप्त षट् पञ्च भागता ।
सप्ततु पञ्च वेदाग्निमध्या न्नालिगृहं भवेत् ।
अग्रस्य मण्टपाद्भित्ति समं सार्धत्रिपादकम् ।
पार्श्वेकाद्वित्रिदण्डेन वेशं कुर्याद्विचक्षणः ।

त्रिचतुष्पञ्च षण्मात्रं पादविष्कम्भमिष्यते ।
द्वारस्तम्भविशालं स्यात् सपादं सार्धमेव हि ।
त्रिपादं द्विगुणञ्चैव पादोत्सेधवशेन वा ।
तत्तत्पादोदये सप्तवसुनन्ददशांशके ।
तत्तदेकांशविष्कम्भं दारुजस्यैव तत्तति ।
त्र्यंशाद्व्यंशमध्यं वा चतुर्भागोनमेव वा ।
कुड्यस्तम्भस्य विस्तारं सर्वयामे प्रकीर्तितम् ।
पादाप्रवेशरसप्तन्तु भागैकं वेदिकोदयम् ।
तत्तुङ्गं वसुभागे तु चतुरंशं गलोदयम् ।
एकांशं कम्पमुत्सेधं द्व्यंशं वेदिकोदयम् ।
ऊर्ध्वे कम्पेनमंशं स्याद्वेदितुङ्गस्य लक्षणम् ।
मसूरोच्च त्रिभागैकं पञ्च द्व्यंशैकमेव च ।
प्रमाणस्तम्भबाह्ये तु हेमस्तम्भस्य निर्गमम् ।
तद्भागस्य त्रिभागैकं होमाज्जगतिवेशनम् ।
P.575 वक्रात्कुमुदपद्मञ्च पद्मात्कुण्डस्य वेशनम् ।
वेत्राणामपि सर्वेषां चतुर्भागैकनिर्गमम् ।
अधिष्ठानादिसर्वेषां पूर्वोक्तानां विधीयते ।
दण्डं सार्धत्रिपादं वा पादविष्कम्भमेव वा ।
उत्तरोच्चं चतुर्भागं तत्त्रिभागैकवाजनम् ।
चतुर्भागैकभागं वा वाजनं निर्गमोच्चद्वयम् ।

5

वलभीदण्डमानं वा वाजिनं पूर्ववद्भवेत् ।
कपोतोच्च द्विदण्डार्धं लम्बनञ्चार्धदण्डकम् ।
तत्समं निर्गमं सार्धदण्डं वापि द्विदण्डकम् ।
शेषं प्रस्तरमानं तु पञ्चभागं विधीयते ।
आलिङ्गमंशमंशञ्च कुर्यादन्तरितं बुधः ।
प्रत्युत्सेधाद्विभागाभ्यामेकांशं प्रतिवाजिनम् ।
तदूर्ध्वे हर्म्यविस्तारे वसुभागैकहीनकम् ।
वेदखण्डस्य विस्तारं तत्तारे चतुरंशके ।
त्रिभागं ग्रीवविस्तारे वेदितुल्यशिरस्तते ।
तत्तारन्तु त्रिभागैकं महानासीतति क्रमात् ।
तत्समन्तु त्रिभागं वा तत्तोच्चं स्यात्तदर्धकम् ।
शक्तिध्वजं ततोत्सेधं त्रिपादं वा विधीयते ।
- - - - - - - . सार्धांशं कन्धरोदयम् ।
वेदांशं वक्त्रमुत्सेधं मध्यांशं पत्रकोदयम् ।
P. 576 वक्त्रताराद्युतं तुल्यं कपोलन्तु त्रिवक्त्रकम् ।
द्व्यर्धं वा समपादोन वक्त्रतारं कपोलकम् ।
तच्छिखायामविस्तारं यथा बलवशोभितम् ।
हर्म्यताराष्टभागैकं त्रिपादं सार्धमेव वा ।
निर्गमस्य महानासी द्वि त्रिदण्डविशालता ।
विस्तारं सममुत्सेधं क्षुद्रनासी प्रकीर्तितम् ।

शिखरे पञ्च भागे तु त्र्यंशं फलिकाविस्तरम् ।
फलिके पञ्च भागे तु वेदार्धं पद्मविस्तृतम् ।
पद्मतारत्रिभागैकं कुम्भतारमिति स्मृतम् ।
कुम्भतारत्रिभागैकं कुम्भस्याधोवलग्नकम् ।
वलग्नस्य त्रिभागैकं कुम्भस्योपरि कन्धरम् ।
कन्धरं त्रिगुणं फालो तत्त्रिभागेन कुड्मलम् ।
स्तूपिकोत्सेध मानं स्यादेकविंशविभाजिते ।
कुड्मलोच्च चतुर्भागमधः पद्मांशकं भवेत् ।
सार्धांशं फलिकोत्सेधमर्धार्धमथपद्मकम् ।
एकांशं कन्धरोच्चं स्यादर्धांशं कम्पमीरितम् ।
अर्धोच्चं वृत्तमेवं स्यादधः कम्पार्धमेव हि ।
कन्धरस्यांशकं कम्पमर्धांशश्चावलग्नकम् ।
षडंशस्य तलोच्चं तु वलग्नांशेन भागिके ।
कुलपञ्च विभागेन सर्ववासेषु योग्यकम् ।
P. 577 जलद्वारं तदुत्सेधं बाह्ये नालं प्रयोजयेत् ।
वितस्ति मानमारभ्य त्र्यङ्गुलस्य विवर्धनात् ।
चतुर्विंशाङ्गुलायामं पञ्चधा परिकीर्तितम् ।
वस्वङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
षोडशाङ्गुलमध्यं स्यात्तारपञ्चप्रमाणकम् ।
समं त्रिपादमर्धं वा खानिच्छिद्रन्तु मध्यमे ।

एकाविंश-चतुर्मात्रं तारं तत्समनिम्नकम् ।
मूलात्पञ्च त्रिभागं स्यादग्रदारसमंचितम् ।
खाटितं सिंहवक्त्रेण किञ्चिन्मूलान्नताग्रकम् ।
एवं नालं प्रकर्तव्यं वामे प्रासादमध्यमे ।
किञ्चिदीशानमाश्रित्य योजयेत्तु विचक्षणः ।
स्तम्भौ दशनन्दाष्टसप्तभागैकहीनकम् ।
द्वारोत्सेधं तथा चामं तदर्धं द्वारविस्तृतम् ।
सुराणां मध्यहर्म्ये तु द्वारं कुर्याद्विचक्षणः ।
पादविष्कम्भमानं वा पादाधिक्येन विस्तृतम् ।
तदर्धं तत्त्रिपादं वा बाह्यात्तु तद्ध्रुच्छ्रये ।
वेदभागत्रिभागं स्यात्कम्पमध्यन्तु बाह्यके ।
भित्ते द्वादश भागे तु बाह्ये पञ्चांशकं भवेत् ।
योगमध्येन संयुक्तं सर्ववासेषु योग्यकम् ।
स्तम्भोच्चे दशनन्दाष्टभागे सप्तरसेन्द्रियाः ।
P.578 गुहास्यच्वठरणायामं शेषांश चरणोदयम् ।
अथवान्तालिपोत्सेधं नवसप्तनवांशकैः ।
पञ्च वेदात्रिभागेषु गुह स्यान्तालिपोदयम् ।
शेषांशं तोरणोर्ध्वं वा नीढं वा कल्पयेत्सुधीः ।
गुहांशं तु तदर्धं वा पञ्च द्वेशैकविस्तृतम् ।
प्रासादस्तम्भविस्तारं त्रिपादं पादविस्तृतम् ।

4

चतुरष्टाश्रवृत्तं वा षोडशाग्रन्तु भद्रकम् ।
सुभद्रं सर्वतोभद्रं कुम्भमध्यादिसंयुतम् ।
नीडिं स्याद्धुच्छ्रयोकेन एकविंशाद्विभाजिते ।
द्वयंशाद्युत्तरोत्सेधमध्यांशं वाजिनं भवेत् ।
वलभिस्सार्ध भागं स्यात् कपोतोच्चं त्रियंशकम् ।
सार्धभागतलोत्सेधं तत्तुल्यं वेदिकाद्वयम् ।
द्वयंशं ग्रीवमुत्सेध मेकांशश्चोत्तरोद्वयम् ।
तदर्धं वाजिनं प्रोक्तं वलभीरंशकोद्वयम् ।
शिखरोच्चं शरांशं स्यात्सार्धांशं स्तूपिकोद्वयम् ।
वृद्धिहानि प्रति प्राग्वैरङ्गमङ्गवयोचितम् ।
पञ्जराकृतिसंयुक्तं तोरणस्यान्तमुच्यते ।
द्वयर्धमुत्तरोत्सेध मेकांशं वाजिनं भवेत् ।
महता वाजिनस्त्र्यांशं मेकांशमुक्त वाजिनम् ।
शेषांशं तोरणोच्चं स्यात्पूर्वोच्चन्तु तथांशकैः ।
P.579 मध्ये पूरसमायुक्तं द्विपार्श्वे तु त्रिविक्रमम् ।
तोरणस्य तु विस्तारं सार्धदण्डद्विदण्डकम् ।
त्रिदण्डं वाग्रमूलाग्रं मकराकृतिसंयुतम् ।
मध्ये कमलपत्रं वा गुलिके कुञ्जराक्षकम् ।
बाह्ये वक्रसमायुक्त मध्योपान्त्यं प्रयोजयेत् ।
उत्तरं वाजनं शाब्द क्षेपणं निम्नवाजनम् ।

१

परितोपारिवा कुर्याद्धारकाण्डस्य वोपरि ।
उत्सन्धयान्तानताग्रन्तु कुर्यान्मकरपृष्ठकम् ।
शिखरे तु महानासीदन्तरं प्रस्तरान्वितम् ।
महानास्ये चक्षुये देके त्रिंशद्भाग विराजिते ।
उत्तरोच्चद्वयंशश्च अर्धांशं वनिता भवेत् ।
वलभीशिकश्चार्धं वाजनोच्च त्रियंशके ।
कपोतोच्चन्तु सार्धांशं प्रस्तरोच्चं शरोदयम् ।
एकांशं वाजनार्धांशं वलभीकांशकं भवेत् ।
अर्धांशं वाजनोच्चं स्याच्छेषांशं नासिकोदयम् ।
अथवालभ्य नाढ्यं वा यथा शक्ति यथा रुचि ।
प्रस्तरोपि यत्कूटोच्चं द्वित्रिभाग द्विभाजिते ।
अर्धांशं वेदिकोत्सेधं तावद्ग्रीवोदयं भवेत् ।
त्रिभागं शिखरोत्सेधं शेषन्तु स्तूपिकोदयम् ।
प्रासादांशे तु विस्तारं कूटोच्चन्तु गलोदयम् ।
p. 580 तद्भागाधिकमाधिक्यं कूटोच्चं वा विधीयते ।
अष्टवाहनसंयुक्तं कोणे कोणे वृषान्यसेत् ।
नागरद्राविडश्चैव वेसरश्च त्रिधा भवेत् ।
चतुरश्रं नागरश्चैव वैश्यस्ये (शू) द्राविडं भवेत् ।
सुवृत्तं वेसरश्चैव द्व्यश्रवृत्तं तथैव च ।
षडश्रं स्कन्धकान्तश्च शिखरेऽपि तथैव च ।

ध्वास्यापिण्डिकाकारं तावच्छिखरमेव च ।
अन्यथा विधिकल्प्या तु महता विपदां पदम् ।
सर्वेषां शिखराकारं प्रतिमाकारं योजयेत् ।
षडश्रं स्कन्धनाहर्म्ये न कर्तव्यं तदेवताम् ।
एकाद्या पञ्च भूम्यन्तं दिक्षु देवं प्रकल्पयेत् ।
अग्रतो मण्टपे पार्श्वे नन्दिकालेश्वरास्थितौ ।
दक्षिणे मण्टपे मध्ये स्थिते वैनासिकन्तथा ।
. . . . गजराजप्रतिष्ठितम् ।
पूर्वे च पश्चिमे तत्र कुर्यात्तत्र विचक्षणः ।
दक्षिणे दक्षिणामूर्तिं पश्चिमे च्युतमेव हि ।
उमास्कन्दसहितं देवं योजयेत्तु विचक्षणः ।
उत्तरे तु विधाता स्यात्कुर्यान्मण्टपोत्तरे ।
एवं मूलतले प्रोक्तमुपर्युपरि वक्ष्यते ।
तले तले ऽमरान्सिद्धान्गन्धर्वादिमुनीन्न्यसेत् ।
P. 581 द्वात्रिंशत्प्रतिमाकारं सर्वत्र परिकीर्तितम् ।
प्रदेशूपरि कोणेषु तत्तद्वाहनमीरितम् ।
सर्वे मुक्त्यादिभिर्युक्तं विमानं संपदां पदम् ।
वेदाश्राभं जन्मतस्तूपिकान्तं
द्व्यं शताभं स्यात्स्ववृत्तं न यावत् ।
तं ध्या द्वोगं स्ववृत्तं द्व्यश्रं
षड्वस्वश्रं प्रस्तरस्थूकान्तं वेदाश्राभं ब्रह्मकान्तं नमामि ।

॥

अष्टाश्राणां विष्णुकान्तन्धपाणां
रुद्रकान्तं स्यात्सुवृत्तं द्वयश्रम् ।
तिषडश्रं स्कन्धकान्तवर्णिनां
भद्राभद्रास्यौ भद्रस्य सकर्णकूटम् ।
मुनिषं शशांशैर्नीडैर्नीडस्य तोरणाढ्यम् ।
सर्वेषु युक्तं विधिकेन भूमौ हर्म्यं यामाग्रह
सन्ममार्पितम् । विष्णुपादस्तु विलयं सनातनं
वासवन्मभवनं विनामकागे हसौ व्यवसध्यौश्वमानका ।

इति शेषभाष्ये शिल्पार्थसंग्रहे
एकतलविधानो नाम द्वाविंशोऽध्यायः ॥

श्री

नारदीये गोपालम्

Page 609 वेणुवीणाधरश्चैव हरिमानं प्रवक्ष्यते ।
मध्यमं दशतालेन सर्वाङ्गं परिकल्पयेत् ।
वामपादस्थितश्चैव दक्षिणं कुञ्चितं भवेत् ।
तिर्यग्जंघसमापत्य बाह्याबाह्यगतं तु वा ।
अङ्गुष्ठाग्रस्थितं चैव कुञ्चितं पादमुच्यते ।
पूर्वहस्तद्वयश्चैव वेणुवीणाधरं भवेत् ।
ललाटमध्यगात्सव्ये मात्रं नीत्वा पुरोहिते ।
सर्वे तु द्व्यङ्गुलं नीत्वा हीत्यासूत्राद्विमात्रकम् ।
दक्षिणे नाभिमध्यन्तु वामे द्व्यङ्गुलमुच्यते ।
मध्यवामे षडङ्गुल्यं कुञ्चितश्चोरुमध्यमम् ।
स्थितांघ्रिपार्ष्णिपार्श्वे तु लम्बयेदातिभङ्गके ।
नतमानं शरांशन्तु बिम्बं कुर्याद्विचक्षणः ।
तत्सूत्राद्वाम बाह्वग्रं स्वस्वाङ्गुलमुदाहृतम् ।
तस्मादपरबाह्वग्रं नीत्रं वामभुजस्य तु ।
मणिबन्धावसानं वै विंशन्मात्रं प्रकीर्तितम् ।
तत्त त्कोप्परनीत्रं तद्रसमात्रमुदाहृतम् ।
तत्सूत्राद्वामहस्तं स्यात्तर्जन्यान्तरमिष्यते ।
P. 610 वेदरुद्रामुखाङ्गुलयमीष द्वत्कसमान्वितम् ।
तत्सूत्रात्सव्यहस्तस्य मुखाङ्गुल्याग्रकान्तकम् ।
चतुर्विंशतिमात्रन्तु द्व्यन्तरन्तु दशाङ्गुलम् ।

2

कर्णसीमोद्धृतं विंशन्मध्याङ्गुल्याग्रसीमकम् ।
एक द्वि त्रि चतुष्पञ्च हीनं वा युक्तिनाकृति ।
सूत्रकक्षान्तरं सव्ये एकादशन्तु मात्रकम् ।
तत्सूत्राकोप्परात्सव्ये सैकविंशति मात्रकम् ।
तत्सूत्रान्मध्योदरं वामे सप्तमात्रमुदाहृतम् ।
तत्सूत्रवामश्रोतं तत्सप्तादशन्तु मात्रकम् ।
सूत्राद्वारोरुमूलान्तं पञ्च नन्दाङ्गुलं भवेत् ।
सूत्रात्कुञ्चितजान्वन्तं पञ्चा नन्दाङ्गुलं भवेत् (ङ्गुलमुदाहृतम्
वामपादस्य पार्श्वे तद्दक्षिणं पृष्ठकान्तरम् ।
दशमात्रञ्च कर्तव्यं द्वादशांशं विधीयते ।
अन्योन्यन्तूरुनी श्राणि यथा सौन्दर्यमाचरेत् ।
वरहस्तद्वयञ्चैव शंखचक्रधरान्वितम् ।
नित्या सूत्रसमं कुर्यात्कर्तर्यग्रं प्रशस्यते ।
नीलनीरद सङ्काशं पुण्डरीक समाक्षिकम् ।
मयूरपिञ्छ सम्बद्धशेखरं केशबन्धनम् ।
कमला च महीदेवी सव्य सव्यास्थिते हितौ ।
कृष्णबाहु समानेन तुङ्गमानमुदाहृतम् ।
P.611 बाणं श्रीवत्समायुक्तं कटिसूत्रेण वेदितम् ।
कर्णदौ शंखपत्रौ तु श्वेततावानि मर्दयेत् ।
वंशनालस्य रन्ध्रे तु ववेशीधर पल्लवा ।

3

शंखचक्रनतं कुर्यात्साचीकृत निरीक्षणम् ।
वंश नालस्य नाहं तु नन्दमात्रं प्रकीर्तितम् ।
वंशनालस्य दीर्घन्तु सार्धषट् सप्तमात्रकम् ।
एवं वेणुधरश्चैव हरिन्मानं प्रकीर्तितम् ।

इति नारदीये

॥ कृष्णलक्षण पटलः ॥

—॥—

उष्णीषाङ्गुणमात्रमक्षिपुटके हन्वन्तरे दक्षिणे
वामे मध्यम चूचुकमध्यमे शशिकला वामेच वामेतरे ।
ऊरोर्मध्यमदेशके स्थितियुतेवामांघ्रिकोष्पान्तरे
सूत्रालम्बितबाहुवेणुधरकं श्रीशस्य सत्यं वद ॥

पूर्वे करे वेणुपुष्पपाद्यं परे भुजे शंखारिचक्रधृक् ।
स्याद्वामस्थ वारे स्थितजानुतिर्यग्गोपालमूर्तेस्तुवारं विधिज्ञैः ॥

पञ्च वक्त्रं महाभीमं कालाग्निसदृशप्रभम् ।
चन्द्रमौलिं नीलकण्ठं पञ्चादशन्तु नेत्रकम् ।
अक्षमाला शिरोमाला सर्पमालाभि मालिका ।
किरीटं संस्थितं लिङ्गं त्रिवर्णं घोररूपकम् ।

P. 612 शंखश्च मूर्द्ध्वभागश्च मध्यमं नीलवर्णकम् ।
अधमं रक्तवर्णश्च मुखवर्णं यथाक्रमम् ।
चक्रं खड्गं यथा माला मुसलाङ्कुशवज्रकम् ।
बाणं रुद्राक्षमाला च दक्षिणे बाहुकीर्तितम् ।
शंखं खेटं कपोतश्च कपालश्चोर्ध्वहस्तकम् ।
सर्पं डमरुकं पाशं मृगराजश्च वाहनम् ।
एवं नृसिंहमूर्तिः स्याच्छत्रुमारणविक्रमम् ।

॥श्री॥

आगस्त्ये सकलाधिकारे उपपीठविधिः

—— ० ——

கஜநயிகாரத்தில் உ—— —டும்

Page-629 होमादुत्तरसीमान्तं द्वारमानं विधीयते ।
पादबन्धमधिष्ठानं द्वारशोभान्वितं कुरु ।
P. 630 द्वारोच्चे रसभागे तु गुणांशमुपपीठकम् ।
एकांशन्तु तलोत्सेधं द्विगुणं पाददैर्घ्यकम् ।
उपपीठोदयेनैव अष्टादशांश भाजिते ।
षडंशन्तु तलोत्सेधमष्टांशं पाददैर्घ्यकम् ।
वेदांशप्रस्तरोत्सेधं त्रिवर्गादीनि पूर्ववत् ।
आताधिष्ठानतुङ्गं स्यात्समपादार्धमेव वा ।
पादोनद्विगुणं प्रोक्तं द्विगुणं पादोच्छ्रयं भवेत् ।
एतदर्धविवर्धं वा तत्तत्पञ्चांशमांशकम् ।
पञ्चसप्तातिमानन्तु प्रत्येकन्तु पृथक् पृथक् ।
प्रासादे मण्टपे चैव गोपुराणां विधीयते ।
उपपीठे भण्यमाख्यातं . . . विधीयते ।
आतोत्सेधांशमानेन सर्वालङ्कारशोभितम् ।
नरनारीनाटकोपेत चतुष्पाद विभूषितम् ।
नाना पञ्जरसंयुक्तं नानातोरणसंयुतम् ।
भद्रं वापि विभद्रं वा अधिष्ठानाङ्गमिष्यते ।
यदुपानस्य निष्क्रान्तं दण्डदण्डैकबन्धनात् ।
मनुदण्डावसानान्तं मण्डपं वा समं भवेत् ।

अधिष्ठानस्य चोत्सेधं दशभागं विभाजिते ।
अंशमंशेन निर्गम्यं नवांशान्तं विधिं क्रमात् ।
यथाबलं यथाशोभं यथासौन्दर्यमाचरेत् ।
p.631 यद्द्रव्यैर्मूलकारे तु पादबन्धं
प्रत्यङ्गबन्धममराग्रजराजयोग्यम् ।
सामरूपकविशेषविमानयुक्तं
यद्धारितं प्रतितलञ्च तदिष्टदं स्यात् ॥
स्तम्भं व्यासं बाहुल्यं द्वारोत्रिदण्डाधिनिर्गतः ।
पादुकात्पादा जगत्यास्ततदूर्ध्वगात् . . . ।
पादारितं प्रोक्तं त्रिचतुष्पञ्च तदाकृति ।
तन्निष्क्रामे तु भागैकं नीत्वा रङ्गनिवेशनम् ।
यथाबलं यथाशोभं तथा कुर्याद्विचक्षणः ।
सर्वेषाञ्च प्रवेशञ्च त्वनिष्क्रं हेवमानता ।
. . . . चोद्वर्वा देवान्नाम स्थापनं शुभम् ।
तत्रता पादभागेन ऊर्ध्वाधिष्ठानमिष्यते ।

इत्यागस्त्ये सकलाधिकारे
त्रिभागोपपीठो नाम तृतीयोऽध्यायः ॥

श्री.

॥ ब्रह्मीय चित्रकर्मशास्त्रम् ॥

— ० —

Page. 666 ब्रह्मोवाच :—

प्रासादं पञ्चमानानि भूषणान्यम्बराणि च ।
वर्णाकारादिकान् सर्वं मूर्तीनां कथयात्मना ।
यथाप्रश्नं गदिष्येहं संयतात्मन् शृणु क्रमात् ।
p. 667 पर्वताकृति हर्म्यं स्यान्नारसिंहवराहयोः ।
स्वस्तिकं सर्वतोभद्रं नन्द्यावर्तं चतुर्मुखम् ।
वामनस्वामिनो धूर्ष्यं स्वस्तिकं हस्तिपृष्ठकम् ।
जमदग्नेर्भवेत्पञ्च वसन्तस्तौ प्रतिष्ठितम् ।
राघवस्याङ्गनाकारं सर्वतोभद्रसाह्वयम् ।
भवेन्नन्दिविशालं च चित्रशिल्पं चतुर्मुखम् ।
बलभद्राख्यरामस्य भवेद्ध्वजविमानकम् ।
स्वस्तिकं सर्वतोभद्रं नन्द्यावर्तं सुपद्मके ।
गणिकागारमष्टाङ्गं चित्रशिल्पं चतुष्कूटे ।
कृष्णस्यैतानि हर्म्याणि क(र्म)णोऽमानतस्तथा ।
स्वस्तिकं सर्वसामान्यान्मूर्तीनान्तु सनातनम् ।

— तालभेदम् —

एकादि दशतालान्तमेकैकं त्रिविधं भवेत् ।
चतुर्मात्राधिकं न्यूनमुत्तमं चाधमं भवेत् ।
न्यूनाधिकान्तरितं यन्मध्यमं प्रविधीयते ।
द्वितालमुत्तमं रूपं मध्यमं स्याद्द्वितालकम् ।

(2)

कूर्मस्य च वराहस्य नृसिंहस्य च मध्यमम्।
दशतालन्तथा पञ्च तालमुत्तममेव हि।
वामनस्य त्रिरामाणां कृष्णस्यापीतमध्यमम्।
दशतालमिति प्रोक्तं कर्मिणां सप्ततालकम्।
P.668 यथाक्रमेण वक्ष्यामि वामनानार्चनाहनकम्।
मत्स्यमानविभागन्तु वक्ष्यते विधिनाधुना।
नासाग्रात्पुच्छपर्यन्त मष्टविंशतिमात्रकम्।
नास्या नेत्रान्ताद्विमात्र चतुष्कं कर्णाद्विमात्रकम्।
तस्मात्तत्पुच्छमूलान्तं नवकालकमुच्यते।
तस्मात्पुच्छाग्रकं मात्र चतुष्कं हस्तिकुम्भवत्।
सशिरः कुक्षिपुच्छमूलान्तं षण्णवेदेवकम्।
पुच्छमूलं द्विमात्रं स्यात्पुच्छाग्रं स्यात्त्रिकोलकम्।
द्विमात्रात्यर्धमात्रं स्यात्पक्षस्यायामविस्तरौ।
स्यातां सर्वाङ्गनाहं स्यात्तत्तदर्धं गुणार्धकम्।

इति ब्रह्मीयचित्रकर्मशास्त्रे
मत्स्यलक्षणं नाम प्रथमम्

अतः परं कूर्मरूपस्य वक्ष्ये मानविभागिकम्।
द्विमात्रं स्याच्छिरोमानं कर्णवेदांशकं भवेत्।
द्विमात्रं हृदयान्तं स्यात्तत्समं नाहमध्यमम्।

३

त्रिमात्रं पृष्ठमिते प्रोक्तं दामप्रोक्तं दलन्तथा ।
एकैकमङ्गुलं प्रोक्तं पादमानं तथैव हि ।
आयामसम विस्तारं शेषमूह्यं विधानतः ।
पञ्चवर्णोज्वलं वंशमन्तश्चन्द्र समप्रभम् ।

इति ब्रह्मीये चित्रकर्मशास्त्रे
कूर्मलक्षणं द्वितीयम्

–९–

p.669 वराहम् —

वक्ष्ये वराहरूपस्य लक्षणञ्चतुराननम् ।
दश द्वादशमात्रं स्यान्मूर्ध्नोऽङ्घ्रितलसीमकम् ।
मूर्ध्नोश्च मस्तकन्तस्माद्दशोघोणहनूद्दशम् ।
भागं वेदाङ्गुलं रुद्रमात्रकर्णकलाद्वयम् ।
कर्णे च हृदये नाभि नाभेर्मेढ्रमुखाङ्गुलम् ।
षड्भागमूर्ध्वतश्चोरुभागं जन्म त्रयोदश ।
कलाजंघातलं भाग सप्तादशाङ्गुलायतम् ।
नेत्रमात्रद्वयं भ्रूस्यान्नेत्रास्त्रकत्वकशराङ्गुलम् ।
स्मृत्वा भागं हनुर्मात्रात्रयं नेत्रान्तरं भवेत् ।
नेत्रायाम विमात्रे तु नेत्राच्छ्रोत्रं समात्रकम् ।
सद्व्यङ्गुलं कर्णतारं द्विगुणायतमेव च ।
तत्समं कर्णनालं स्याल्लम्बमर्धाङ्गुलं घनम् ।

5

चतुरष्टयवव्यासौ नालौ पूर्वापरौ मतौ ।
एकादशाङ्गुलव्यासं मुखं नेत्रन्तथाङ्गुलम् ।
नासामूलन्तथा सप्तमात्रमध्यं त्रिकोलकम् ।
नासाग्रात्तारभागार्धमात्रं स्रोतस्तथाङ्गुलम् ।
पुष्करव्यासमध्यर . . . त्रिकलाङ्गुलम् ।
निर्गमन्तस्य मूलं स्यात्तारभागन्तदर्धकम् ।
तस्याग्रविपुलं तस्मिन् दैर्घ्यायामं द्विमात्रकम् ।
कण्ठतारं नवाङ्गुलयं बाहुमूलन्तदेव हि ।
P.670 षड्विंशदङ्गुलं जत्रु सूत्राधस्ताद्भुजायतम् ।
कोप्परद्वयङ्गुलं साष्टमात्रन्तलं प्रकोष्ठकम् ।
सप्ताङ्गुलन्तथा यामं मध्यायामं षडङ्गुलम् ।
पञ्चादशाङ्गुलन्नौमि प्रदेशिन्या कलाद्वयम् ।
कनिष्ठाङ्गुष्ठयोर्दैर्घ्यं त्रिकलन्तलविस्तरम् ।
त्रियव त्र्यङ्गुलन्तारमणिबन्धस्य सार्धकम् ।
पञ्चमात्रं प्रकोष्ठस्य षडयवं त्रिकलं वसु ।
- - - - मात्रं स्याद् बाहुमध्यविशालकम् ।
बाहोः पर्यन्तमेकेन चत्वारिंशति मात्रकम् ।
कक्षयोरन्तरं वक्षःस्थलं त्रिसप्तमात्रकम् ।
अर्धेन षोडशाङ्गुलयमध्यन्तस्मात्कलाधिकम् ।
तारं श्रोण्या कटीतारमर्धेन विंशदङ्गुलम् ।

ऊरू त्रयोदशाङ्गुलयमधो जानु नवाङ्गुलम् ।
जंघाया मध्यविस्तारं सप्तमात्रं कलाद्वयम् ।
द्वियवं नलकाधारं पार्ष्णितारं तदेव हि ।
पश्चाङ्गुलं सद्वियवन्तलमध्यमविस्तृतम् ।
सार्धमात्रन्तु पादाग्रतलं वैपुल्यमुच्यते ।
भागमात्रद्वयं भागायतं त्रित्रियवन्तथा ।
त्रिमात्रार्धं तथाङ्गुलयं मानं सप्तयवाधिकम् ।
द्विमात्रार्धन्तथा सप्त यवमायामविस्तरम् ।
P.671 अङ्गुष्ठादिकनिष्ठान्तमङ्गुलीनां यथाक्रमम् ।
अत्रानुक्तन्तु यत्पश्चाद्दृश्यते तं तयाब्जकम् ।
शिखिकन्धर पिञ्छाभो नीलोत्पलनिभोऽथवा ।
रक्ताम्बरश्चतुर्बाहुः शंखचक्रगदा वरा ।
हृस्वकर्णकमौली स्यान्नारसिंहवराहयोः ।
कुण्डलं मकरं रत्न हारकेयूरमङ्गदम् ।
रक्तद्वयव चर्मस्यावयवमुदरबन्धनम् ।
तस्याग्रमण्डनं रत्नकटकैस्त्रिभरुप्रभैः ।
कृतिपाशकरं बन्धं मुद्रिका रत्नमुद्रिका ।
रत्नबन्धमुखं मुक्ता कालपञ्चनवीरकम् ।
प्रयोज्यं प्रलम्ब सूत्राच्च सूत्राभ्यां मुखशोभितम् ।
- - - न्दरं बादलं स्यान्मुद्रिकारत्नमुद्रिका ।

6

आदाय मेदिनीमूरो सिह्मविष्टरविष्टरः ।
- - . लक्ष्मीसहितो वामदक्षिणे धरे ।
किञ्चिन्मानुषमाश्रित्य सनन्दे विमद्यमे ।
स्थानं स्याद्देवि वीरञ्चे दब्रह्मके विनिवेशयेत् ।
इति ब्रह्मीये चित्रकर्मशास्त्रे
वराहलक्षणं नाम तृतीया ।

श्री

नृसिह्मञ्च चतुर्मात्रं तस्मादास्यं द्विमातकम् ।
अधरद्वय ङ्गुलन्नेताद् भ्रुवोर्मात्रात्रयन्ततः ।
P.672 शेषंल्ललाटतत्तार नवमात्रात्रिगन्तरम् ।
द्वयद्वयङ्गुलं नेत्रा यवमात्रयवं नतम् ।
तस्यार्धं यवविस्तारं यतमास्यात्कनिष्ठिका ।
पञ्चार्धं भवविस्तारं तन्मद्ये स्थितमण्डलम् ।
ज्योतिर्यवस्तस्य दृष्टिरष्टांशं विस्तरं मतम् ।
वयरूपाविशेषश्च श्वेतं शेषं यवद्वयम् ।
ऊद्वर्मर्म तथा यामभवतारमधोगतम् ।
यवद्वयं तथो भागा यते पञ्च नते भ्रुवौ ।
द्वादशाङ्गुलविस्तारं नेत्रसूत्रसमेतुकम् ।
आस्यतारं दशाङ्गुलयं विवरश्चतुरङ्गुलम् ।
नन्दाङ्गुलन्ततः स्रुक च द्वयोर्मध्ये चोन्नतं मुरवम् ।

सार्धाद्विमात्रं नासाग्रतारन्तस्मात्तथोगतः ।
बन्धमेकाङ्गुलन्तारं शेषं वर्तुलमुन्नतम् ।
चत्वारः स्युः पुरोदन्त मात्रार्धं विस्तृतायतम् ।
दन्तवेष्टनासन्धेनासेभ्यो द्व्यङ्गुलदीर्घिका ।
तीक्ष्णाग्रौ बालचन्द्रार्धनिभौ मात्रार्धविस्तरा ।
पूर्वं दंष्ट्रा तथा पार्श्वं चानुपूर्वक्षयान्वितः ।
अधोदन्तस्तथा तेभ्यो यवेन विपुलायता ।
जिह्वा षडङ्गुलायाम कोलकद्वयविस्तृता ।
भागं स्त्व क्रात्कपालान्तस्त्र क्रात्कोणाच्चतुष्कला ।
P.673 कर्णमूलादधस्तात्तु कपोलं त्रिकलाङ्गुलम् ।
अपाङ्गात्कर्णमूलान्तं पञ्चमात्रन्ततः कला ।
कर्णमूलान्ततः खण्ड त्रिमात्राध्यायतं मतम् ।
चतुर्थव कला तारा शंखपत्रनिभाकृति ।
शौद्रौ मृतरवचक्षं मण्डलं वीक्षणान्वितम् ।
अन्याङ्गायामविस्तार वाराहस्यात्तमागवत् ।
शंखगोक्षीर कुन्दाभो रक्तपिङ्गलकेसरा ।
रक्ताम्बरधरः शंखचक्रधारी चतुर्भुजः ।
पुलमी हारहारं स्याद्वलयं पाशुमण्डनैः ।
रक्तञ्च कृत्रिमं वक्रे युक्तं स्यादुदरबन्धनम् ।
तथा कृत्रिमवक्त्रैश्चालङ्कृतं कटिबन्धनम् ।

4

उरसीसूत्रसङ्काशं पुष्पमालोपशोभितम् ।
रत्नोज्वलमुखो रत्नकटके हस्तमण्डनम् ।
किङ्किणीपादजालं स्यान्मुद्रिका रत्नमुद्रिका ।
मनोज्ञा सहितं सिंहासनारूढसुखासनम् ।
गजहस्तासनो वापि ऊर्ध्वजानुस्तथापि वा ।
उभयोर्जानुकं कुर्याद्भीषिभ्यां विनासने ।
वैतार्धिकं समं पादमर्ध्ववैतार्धिकं स्थिते ।
स्थानकं देवि के कीर्तिमानुषावेषमासनम् ।
इति ब्रह्मीये चित्रकर्मशास्त्रे
नरसिंहलक्षणं चतुर्थम् ।

P.674 वामनम् —

सांप्रतं वामनस्याहं वक्ष्ये मानमज शृणु ।
उष्णीषात्पादपर्यन्तं द्वित्रिंशं वेदमात्रकम् ।
कोलन्तु त्रियवेनोन भागन्तस्माद्यवोनकम् ।
समं वाथ द्वयं मात्र द्वितीयं सप्तमात्रकम् ।
तुल्यञ्च तत्समं सूर्य मात्रामात्र द्विमुखम् ।
कोलकञ्च क्रमान्मूर्ध्नो केशान्तं हनुपुटान्तकम् ।
अनुगलञ्च हृन्नाभेश्च मेढ्रमूलकम् ।
ऊरूजानुस्तथा जंघातलं स्यात्पञ्च तालकम् ।

तालायामं दशाङ्गुलयं मुखं स्याद्विपुलं भवेत् ।
यवात्यर्धोनकलं नेत्रान्तरं श्रोत्रदृशोरपि ।
द्व्यन्तरं पञ्च मात्रं स्याच्छ्रोत्रस्य विस्तृतं कला ।
तारद्विगुणमायामं नालालम्बञ्च तत्समम् ।
मात्रार्धमात्रविस्तारौ नालौ पूर्ववरौ मतौ ।
नासाग्रविपुलं मात्राद्वयमर्धान्तदर्धकम् ।
मात्रमूलततो सुस्यान्तन्तौ यवाङ्गुलमुन्नतम् ।
नासाग्राश्रोगिमूलान्तं द्वियवो द्व्यङ्गुलोन्नतम् ।
अधरार्धं तदर्धं स्यात्तनस्यात्ततन्तुतत् ।
द्विगुणन्तस्य दीर्घं स्याद्दीर्घं द्विगुणमास्यकम् ।
उत्तरोष्ठ-यवं . . . वालिकाया भवेत् ।
सर्वस्य वाङ्गुलायामस्वधरोष्ठादयो हनु ।
P.675 सषड्यवकलं खण्डा . ह पर्यन्तनिर्गमम् ।
अष्टाङ्गुलविशालं स्यात्कन्धरं हीत्यासमं तथा ।
द्विस्सप्ताङ्गुलदीर्घं स्याद्दशमात्रप्रकोष्ठकम् ।
मणिबन्धान्तलं भागं तस्मान्मध्याङ्गुली समा ।
अर्धाङ्गुलोन दीर्घं स्यात्प्रदेशिन्या अनामिका ।
कलाङ्गुलायताङ्गुष्ठ कनीयस्य वितस्तृतौ ।
नवषट्सप्ताष्ट पञ्च यवैस्तरा क्रमात् भवेत् ।
अङ्गुष्ठादि कनिष्ठान्तमङ्गुलं नासात्कलाद्वयम् ।

सषड्यवविशालं स्यात्क्रमेण मणिबन्धकम् ।
प्रकोष्ठकोप्परं बाहुमूलस्याष्टादशाङ्गुलम् ।
वक्षःस्थलस्य विपुलं मुखमध्यं कलामुखम् ।
. . . . श्रोणितारं षोडशाङ्गुलकार्मुकम् ।
अङ्गुलोत्कतमं मूले ऊरुजानु विशालकम् ।
स्तनसप्ताङ्गुलं जंघा विस्तारश्च ततं मतम् ।
नालका विपुलं सार्ध रुद्राक्षं पञ्च मातकम् ।
स चतुर्यवमग्रस्य तलस्य विपुलं भवेत् ।
कलाङ्गुलयतोङ्गुष्ठ तर्जनी तत्समा यमा ।
दीर्घोन्तान्तः . . . . तर्जनीतारमङ्गुलम् ।
मध्यमादि कनिष्ठान्तमेकैकातियवोन्नतम् ।
आयामे तु विशाले तु यवमानन्तु पूर्ववत् ।
P. 676 अग्रतारश्चतुर्भागं द्विभागं नख विस्तरम् ।
विस्तरार्धे समायामस्त्रिता पादाङ्गुलीनखा ।
परिमाणमिति ज्ञेया अङ्गमानञ्च विस्तृतम् ।
अनुक्तमेवमूह्यं यद्विद्भिर्विमलोदये ।
सप्तचामममकारस्य रक्तवर्णंचतुर्भुजम् ।
शंखचक्रगदाधारा . . . . . . ।
उष्णीषपट्टसन्दिग्ध शिरस्के रत्न कुण्डली ।
रत्नाहारतथाबाहु कटकौ हन्त मण्डनम् ।

॥

कृतं नाम्नोदृशो बन्धो . . . . न्तदेवहि।
कटीबन्धं तथा पाद कटकं पाद मण्डनम्।
मुद्रिका भद्रकर्णौ स्याद्भूषणैरपि भूषणैः।
अथवा स शिखायादि . . तत्तस्य मस्तकम्।
कृष्णाजिनधरस्सोपवीतमौञ्जीञ्च मेखला।
कमण्डलधरः कूर्चधारीबालधनुः शुचिः।
स्थानकं समपादन्ते विके ब्रह्मे नवासनम्।
इति ब्रह्मचित्रकर्मशास्त्रे
वामनलक्षणं नाम पञ्चमः

जामदग्न्यरामः —
अथाधुनोच्य रामस्य जमदग्नेस्तु लक्षणम्।
मध्यमं दशतालं स्यान्मानोन्मान प्रमाणकम्।
द्विभुजस्तरुणादित्यरुचिः श्वेताम्बरः शुचिः।
p. 677 शुक्लपीताम्बरो वाथ शुक्लवस्त्रोत्तरीयकः।
लोपपीठो जटामौली पद्मकुण्डलमण्डितः।
चन्द्रचन्द्रमुरोहारवलयं बाहुमण्डनम्।
मणिबन्ध विभूषन्तु कटकं रत्नमुद्रिका।
एवमाभरणे सम्यग्भूषितं तीक्ष्णटङ्कभृत्।
नालिगेहञ्च सप्तांशे मानुषे स्थानकं भवेत्।

12

ततैव चासनं प्रोक्तं वैशाखस्थानकं भवेत्।
इति ब्रह्मीये चित्रकर्मशास्त्रे
जमदग्निरामलक्षणं षष्ठः॥

श्री

रामः —

वक्ष्येऽहमधुना सम्यक् दाशरथे रामस्य लक्षणम्।
षड्विंशति शताङ्गुलय दशतालन्तु पादतः।
मूलान्तमिति निर्दिष्टं मूर्ध्ना सद्वियवाङ्गुलम्।
ततस्त्रिमात्रकेशान्त . . . . . तस्मात्।
नेत्रान्तात्पुतन्तस्माद्धनु सद्वियवं भागमेवं प्रकीर्तितम्।
अर्धाङ्गुलं गलं खण्डं त्रिमात्रं षडयवं भवेत्।
तस्माद्धृदयपर्यन्तं षण्मात्रं षडयवं भवेत्।
तस्मान्नाभिस्ततो मेढ्रं साङ्गुलं तालमेव हि।
तस्मादूरुस्तथा पञ्च विंशमात्रञ्च षडयवम्।
भागं जानुञ्च जंघाञ्च सममेवोरुसादृशम्।
चरणाद्वियवं भागं सत्सादृशाङ्गुलं तलम्।
P.678 ललाटे पुरोगमित्युक्तमष्टार्धाङ्गुलविस्तरम्।
उत्क्षेपात्पार्श्वयोस्तारावत्तस्या द्वियवाधिकम्।
तस्माद्भ्रूमध्यममरत्रिद्वयसद्वयवन्तथा।
तस्मात्तु तत्समं ज्योति मण्डायामस्त्रितासितम्।

तत्सूत्रान्नेत्रसूत्रंस्याच्छ्रोत्रसूत्रन्तु तत्समम् ।
तस्माद्भ्रूसूत्रपर्यन्तमूर्ध्वं कर्णस्य तुङ्गकम् ।
तस्माद्दशास्त्वधः कर्णनालमूलं यवद्वयम् ।
वेदाङ्गुलन्तदालम्बमर्धमात्रन्तथैव (न)च ।
चतुरष्टयवव्यासौ नालौ पूर्वपरौ मतौ ।
कर्णं कालिविशालं स्याद्द्वयेनोनमुखं मुखम् ।
नेत्रस्य तारदीर्घस्य अष्टादश च षड्यवैः ।
तस्य मध्ये स्थितश्चैव अर्धशेषं सितांशकम् ।
मध्ये ज्योतिर्यवाद्दृष्टि युगमात्रं कनीनिका ।
यवायामं तयोर्नेत्र चाङ्गरक्तयवाततम् ।
तदर्धविस्तृतं वर्म यवार्धं स्यादधोगतम् ।
ऊर्ध्वं स्याद्वर्मविस्तारं द्वियवस्याद्यवं भवम् ।
अशीतिलक्षणोमाने त्रिवर्णे लोचने शुभे ।
अपाङ्गात्कर्णमूलान्तं सप्ताङ्गुलमुदीरितम् ।
यवोनकोलकं गोजि किल नासाग्रतुङ्गकम् ।
पुष्कलस्सन्ध्ययवोत्सेधं तस्य तारं यवं भवेत् ।
p.679 मात्रामात्रार्धकौ नासापुटतारायतौ स्मृतौ ।
यवं पुटस्य बहुलं कालनेत्रान्तरं भवेत् ।
क्रमेण चतुरष्टाष्ट दशार्धैर्यवाभिः स्थितम् ।
मूलमध्याग्र नासास्याज्ज्योन्यायाम श्चतुर्यवम् ।

तदर्धविस्तृतश्चोर्ध्वे शेषतारश्चतुर्यवम् ।
तद्दैर्घ्यं सयवं भाग तस्य पाली यलातती ।
अधरा सयवाङ्गुल्या तारान्तद्विगुणायतम् ।
तस्य पाली यवात्यार्धताराशेषन्तु रत्नभाक् ।
षड्यवन्तस्य तुङ्गं स्यात्सयवं कोलकं हनु ।
तस्माद्गलं सद्वयवं मात्रकर्णन्ततः कला ।
द्वियवं कर्णमूलं स्यात्तारं स्या द्व्यवमात्रकम् ।
ग्रीवतारसमं बाहुमूलं जानुश्च मध्यमम् ।
हीत्यासूत्राद्धो बाहुदीर्घं षड्विंशदङ्गुलम् ।
कोप्परं द्वयङ्गुलन्तस्मात्प्रकोष्ठं दश कोलकम् ।
मणिबन्धात्तलं सप्तमात्रन्तस्मात्षडङ्गुलम् ।
दीर्घं स्यान्मध्यमाङ्गुल्य षड्यवोना प्रदेशिनी ।
तत्समानामिका विद्याद् द्वयवन्थ द्विकोलकम् ।
अङ्गुष्ठायाममेवं स्यात्तत्समं स्यात्कनिष्ठिका ।
भागत्रयं सप्तमात्रं पश्चाङ्गुलार्धकम् ।
क्रमेण बाहुमध्यं स्यात्कोप्परस्य तथैव हि ।
p. 680 क्रमेण बाहुमध्यं स्यात्कोप्परस्य तथैव हि ।
प्रकोष्ठमध्यमस्यापि मणिबन्धस्य विस्तरम् ।
तलसस्यार्धषण्मात्रं . . ल द्वयङ्गुलार्धकम् ।
षडष्टनाभि चाष्टाभि . . . द्वादशाभिर्यवैः ।

कनिष्ठाङ्गुष्ठायतं मानमङ्गुलीनां ततः क्रमात् ।
त्रियवार्धं पञ्च पञ्चार्धं पञ्चभिर्यवैः क्रमात् ।
नखविस्तारमित्युक्तमायाम द्वियवाधिकम् ।
तिस्रो रेखाः पाणितले शंखचक्रधरस्तथा ।
एकोनचत्वारिंश स्यु मात्रबाह्वो विशालकम् ।
वक्षस्थल सविस्तारं साङ्गुलं दशकोलकम् ।
हंसात्कक्षान्तवाङ्कयन्तस्मात्कक्षाधरः कला ।
हीत्यायास्याङ्गुलं तालं स्तनवक्षं स्थनस्मितम् ।
पञ्चादशाङ्गुलस्यार्धं कुक्षीतस्मात्कलाधिकम् ।
श्रोणी तस्मात्कटी चोरु . . . मुखाङ्गुलम् ।
लिङ्ग पञ्चाङ्गुलं लम्बं विस्तारद्व्यङ्गुलं भवेत् ।
मुष्कालम्बन्तथा भागं विस्तारन्तु तदेव हि ।
मूर्धन्तु कटिकपृष्ठे केशान्तं साङ्गुलं मुखम् ।
तस्माद्ग्रीव चतुर्मात्रे तस्माद्भागं ककुस्ततः ।
कटिसन्धि त्रयोदशाकात्कला तस्मात्तु खण्डकम् ।
साङ्गुलाष्टकलं तस्मात्त्रिजो मात्रा चतुष्टयौ ।
p. 681 एकादशाङ्गुलं पृष्ठे शिरस्तारश्चतुष्कलम् ।
श्रोतारन्तथा द्वयर्धाङ्गुलं कर्णस्य पृष्ठतः ।
पञ्चविंशाङ्गुलं कक्षाधरस्य विस्तृतं मतम् ।
विंशानिम्नकलातारं . . . द्विकोलकम् ।

तस्माद्धीरं स्विकपिण्डस्यान्त नवाङ्गुलम् ।
चतुरङ्गुलमुत्सेधमूरुमूलात्सुवृत्तकम् ।
एकादशाङ्गुलार्धन्तु मध्येरस्या विस्तरम् ।
द्वियवं भागमङ्गुष्ठ दीर्घताल द्विकोलकम् ।
तस्माद्यवाधिकायामं सयवाङ्गुलविस्तरम् ।
प्रदेशिनि त्रिमात्रार्धदीर्घमष्टार्धवानता ।
मध्यमानामिकात्यर्धकलायामतताङ्गुलम् ।
द्व्यर्धमात्रस्सप्तावा यामतारकनिष्ठिका ।
अष्टषट्पञ्च षट्चतुस्त्रियर्धत्रियवानखविस्तरम् ।
क्रमात्तदर्धदीर्घाःस्युःपादाङ्गुष्ठनखादयः ।
अनुक्तमेवमूह्यं वा अङ्गं निम्नोन्नतक्रियम् ।
सुप्रतिष्ठितमेवं स्याच्छुद्धमुक्ताकलापकम् ।
छन्नवीरप्रशस्तं स्यान्मत्स्यावयवमेव हि ।
उदरबन्धनमेवं स्याद्रक्तावयवमेव(हि) वा ।
कटिबन्धं कृत्रिमं पाशं कटिसूत्रं रत्नमण्डितम् ।
रत्नं रजतमेवं स्यात्पादजालं सुशोभनम् ।
P.682 पादाङ्गुलीयकं रत्नमुद्रिका इति कीर्तिता ।

— आभङ्गादिति त्रिभङ्गसूत्रम् —

त्रिभङ्गाङ्गेन युक्तं तद्वैशाखस्थानकं पुनः ।
आभङ्गं समभङ्गश्चात्यतिभङ्गमिति त्रिधा ।

क्रमेण नादिमात्रं स्यादग्निवेदशराङ्गुलम् ।
रुद्रपाङ्क्तिकला रुद्रकला चेति त्रिधा भवेत् ।
आभङ्गादि त्रिभङ्गानां पादाङ्गुष्ठान्तरं भवेत् ।
तत्तत्त्रिभागभागैकं नरं पार्ष्णेरुदाहृतम् ।
मूर्ध्नि पार्श्वे वामनेत्रे स्थिते वामपुटेऽधरे ।
हन्वौ सव्यस्तनौ सव्यपार्श्वे नाभेश्च दक्षिणे ।
वामोरुपार्श्वे वामांघ्रि पार्ष्णीपार्श्वे प्रलम्बयेत् ।
आभङ्गसूत्रमित्युक्तं समङ्गस्य चोच्यते ।
मुखे पूर्ववद्धृदि हृष्टं स्तनवीमस्य वामके ।
नाभ्योरुमध्यमे पार्ष्ण्योर्मध्यमे तु प्रलम्बयेत् ।
नाभिवामेऽथ वामोरुमध्ये पार्ष्ण्यन्तके तथा ।
लम्बयेदतिभङ्गस्य शेषं पूर्ववदेव हि ।
सूत्रात्स्तन त्रिमात्रं स्यात्सूत्रनाभिद्वयाङ्गुलम् ।
सूत्रान्मात्रान्तकं जानुनीव्रं स्यादति भङ्गके ।
एवमेव प्रकर्तव्यं सूत्रनीव्रं सुयुक्तितः ।
सबाणसव्यहस्तस्य तलाग्रे नाभिदेशके ।
P-683 - . तारसमं नीव्रं श्रोणीपार्श्वन्तु कोप्परम् ।
वामं सकार्मुकं हस्तमुष्णीषद्वयचोन्नतम् ।
द्विमुखं तस्य नीव्रं स्यान्मौलिपार्श्वाद्धनुस्तथा ।
दक्षिणे दक्षिणे सीता लक्ष्मणोक्तमनुक्रमात् ।

अस्य सूत्रसमं मानं सौमित्रेः प्रविधीयताम् ।
कनिष्ठं दशतालेन मानोन्मान प्रमाणकम् ।
द्वादशार्धाङ्गुलं विद्यान्मुखमानन्तु सर्वदा ।
स्वात्रेयामुखमानाष्टवक्तं भागं चतुर्यवम् ।
एवमुक्तविधातव्यमङ्ग प्रत्यङ्ग विस्तरम् ।
युवराजदण्डनोपेतसौमित्रिसमभङ्गवान् ।
नवार्धतालमेवं स्यात्सीताबाहुसमायता ।
पादं भागं ततो जंघाद्विमुखश्च चतुर्यवम् ।
जानुभागं भवेद्रूपं जंघातुल्यमुखत्रयम् ।
सषड्यवं ततो हीत्या तस्मात्कर्णाद्विकोलकम् ।
हनौ नासापुटान्तं स्याच्चतुर्यवत्र्यङ्गुलं मतम् ।
तस्मात्तु सङ्गमं भागं द्व्याधिकमिति स्मृतम् ।
सङ्गमात्केशसीमान्तं चतुर्यवश्चतुरङ्गुलम् ।
ततः शिरस्त्रिमात्रं स्यादुष्णीषन्तु तथाङ्गुलम् ।
मुखस्य विस्तृतं सार्धं पङ्क्तिमात्रं सषड्यवम् ।
ग्रीवतारन्तथा बाहुमूलं पञ्चाङ्गुलन्तदा ।
P.684 कोप्परस्य भागतारं त्रिमात्रं मणिबन्धकम् ।
बाहुसीमासुरेकोऽस्मिन् त्रिंशदङ्गुलम् । (लता)
द्विरष्ट द्विषट् द्विपञ्च द्विदकक्षास्थलनधर-
मध्यश्रोणि विशाद्वि द्वादश सप्तषट् चतुरङ्गुलैः ।

·जान्वोरुजंघानलकायस्तोति क्रमात्।
एवम् ह्य विधातव्यमङ्गप्रत्यङ्गविस्तरम्।
दिव्यस्त्रीमण्डनोपेतश्चार्ध्वैशाखसंस्थिति।
· · ·श्यामनिभो रक्ताम्बरो स्वर्णभाक्।
सौमित्रस्य श्यामवास · · जा रूपमासितभा।
शुक्लपीताम्बरधर चित्रमम्बरं वा पङ्कजासनम्।
स्तनद्वयवदीर्घस्य धनुर्मात्रा यवस्य च
सप्ततालं भवेन्मानं चतुराशीति मात्रकम्।
मूर्ध्नि भुवोधूककलमात्रीत्रयन्तस्यान्ततो
मातादधरो मात्रकीर्तिता · · · ।
कर्णान्तस्माद्दशाङ्गुलयंव्याहृतस्माददतावति।
नाभिनाभेभिध्यावामे मेढ्रन्तस्मात्कलाद्वयः।
· · · · · ·कंवाय चोरुसप्तादशाङ्गुलम्।
तलं कलाः कला पञ्च तुलयायामन्तदेव हि।
तारस्य च चतुर्भागं प्रकोष्ठं स्यात्कलादश।
बाहुदीर्घ - · · · ·दीर्घसमायतम्।
P.685 नरोक्तारमात्रो न मुरोबाहु कटीतति।
मदय श्रोण्याकलो नास्यात्पादमात्राविहीनकम्।
हस्तेर्धमात्रहीनं स्यादङ्गुष्ठ · · · ·
उत्तरे बाहिरेमन्ये · ·मुह्यमनोरमे।

सुग्रीववालिपार्श्वौ द्वौ नृपः कपिनवक्त्रकौ ।
बेरं तस्य तु शत्रुघ्नमुत्तमं दशतालकम् ।
सर्वतालविशेषन्तु पश्चाद्वक्ष्याम्यशेषतः ।
मानुषे स्थानकं कुर्याद् ब्रह्मसूत्रान्तसर्वके ।
बन्धप्रतिसरं सीतालक्ष्मणाभ्यां समन्वितम् ।
वसिष्ठवामदेवाद्य सहितस्तास्थवान् कदा ।
देव्याभिरभिलक्ष्मणो . . युक्तसमाकृतिः ।
कक्षाभू कपित्रेण सहितस्तास्थवांस्ततः ।
प्रविश्य च पुरी पश्चं दभिषीनक्तसङ्कुलम् ।
क्राद भीमकनीभिस्साहदेव्या हनुमता सह ।
रक्षादिधीवहीन्द्राभ्यां कपिभिः सहितः स्थितः ।
रक्षोधिपः कपीन्द्रश्च सहजाश्चापि वामगाः ।
दक्षिणे तु वसिष्ठाद्या हनुमान् पुरतस्थितः ।
अम्बराभरणैरन्यैरनुरूपैः प्रशोभयेत् ।
महाबेराधवस्तत्र कर्मचा शंखचक्रधृक् ।
उत्सवे वा बलीबेरं स्नपनाच्च तथैव च ।
P.686 एवं विधिवासिष्ठेन . . कन्याराधवं भवेत् ।

इति ब्रह्मीये चित्रकर्मशास्त्रे प्रादुर्भवकाण्डे
दशरथरामलक्ष्मणः सप्तमोऽध्यायः ।

श्री

21

बलभद्ररामः —

अधुना बलभद्रस्य रामस्योत्सेधलक्षणम्।
मानोन्मानप्रमाणानि राघवस्योक्तमा भवेत्।
शंखगोक्षीरकुन्दाभः पूर्णचन्द्रसमच्छविः।
शंखश्चक्रं भवेन्मौलिं कुण्डलं मकरं भवेत्।
हारं श्रीवत्सकं पादौ द्यमलं वलयं भवेत्।
रत्नावयवसंयुक्तमध्योदरस्यबन्धनम्।
सकृत्रिमं कटीबन्धं वलयं रत्नमण्डितम्।
अन्यैरीदृग्विधैर्भूष्यैर्मण्डनैः पुण्डरीकज।
रक्ताम्बरो मुसलया हलया सत्वजोगुणम्।
वैशाखं समपादं वास्ततकं स्याद्भुजद्वयम्।
सव्यस्था रेवती देवी विपत्नि उत्पलक भास्करा।
चित्रकौशेयवस्त्राढ्या दिव्यस्त्रीमण्डनान्विता।
स्थावर मानुषे कार्यं ब्रह्मसूत्रादि सव्यके।
शापानिरुच्चवृत्यादिभिर्युक्तोथवास्थिता।
इति ब्रह्मीये चित्रकर्मशास्त्रे
बलभद्रराम लक्षणो नामाष्टमोऽध्यायः

श्री.

P.687 कृष्णस्य लक्षणं वक्ष्ये अधुना पङ्कजविष्टर।
नाममण्डनवस्ताभिस्थितिस्थापन भेदकैः।

22

राघवेनसमं कृष्णो विशेषादथ वक्ष्यते।
दक्षिणे यष्टिहस्तः स्याद्वामोन्यासङ्गकोप्परः।
हीत्यासूत्राद्वयो वाम कोप्परं स्याद्दशाङ्गुलम्।
षड्वसप्ताङ्गुलाधिक्य नाभेरन्यकरा नदि।
त्रिचतुष्पञ्च मात्राभिसङ्गतालं सरोरुहम्।
अर्वाजं वकुपृष्ठान्तोरजोगुण समन्वितः।
नासाग्राल्लम्बयेत्सूत्रं वामे हीत्याङ्गुलन्ततः।
सूत्रात्तदर्धहृदयं कलानाभिस्तु दक्षिणे।
मेढ्र भागं भवेद्वाम जान्वन्तं जगतिर्यवम्।
सूत्रान्मात्रत्रयं वामं वामपार्ष्ण्यन्तरं भवेत्।
समभङ्गः भवेद्देव मूर्तिहितव्यन्तथान्ययोः।
हत्वा सप्त वृषान्पूर्वं गोपकन्या प्रजाक्षया।
तयामाङ्गसंयुक्त स्थितो गोप . . नैः सह।
जित्वा सुरतरं देवान् प्रसहेन्द्र पुरस्सरान्।
गृहीत्वास्ति तवायस्मि शालिशास्सत्यभामया।
वामेतु रूढसर्वावा . . मे पितामह।
. . . . बलभद्रानिरुक्तकौ।
दक्षिणे तु भवेतापे ततः पश्चात्स्थितः परे।
दक्षिणे रुक्मिणी सत्या वामे वामे तथैव च।
प्रद्युम्नारव्यश्च रामश्च अनिरुद्धश्च पूर्ववत्।

रुक्मिणी रुक्मभा सत्यभामश्यामनिभा भवेत् ।
स्त्रीभूमिमण्डनैः सर्वगुणे बाहुसमोदये ।
चित्रितामम्बरो सार्धनवताल मिवोदये ।
उष्णीषपादसन्नद्धे तिर्यग्जानुन्नसंश्रिके ।
प्रद्युम्नः श्यामसङ्काशाः वानिरुद्धश्च सन्निभौ ।
सपरस्य श्यामनिभे गोपवधूस्तु दूर्वासमानिभा ।
दिव्यस्त्रीमण्डना सत्यभामा तुल्यन्तु कूलता ।
दामा चामीकरा हासि सौवर्णयोऽथ रुक्मभा ।
सर्वाभरणचिह्नानि यथायोग्यं प्रयोजयेत् ।
शिखाबन्धं भवेन्मौलि कृष्णस्यान्ये सपट्टका ।
अस्यैव बाल्ये वयसां क्रमेण
प्रवक्ष्यते मानतयैकमेवम् ।
आरभ्य पञ्चात्रियवत्सरान्त
वयांसि पञ्चैव द्विरूहपञ्च ॥
क्रमेण पञ्चादिनवान्ततान्ल-
मुत्कृष्टमध्या अधमं युतानि ।
त्रिषण्णव द्वादश पञ्चपाङ्क्ते
संवत्सरेष्वागमविप्रयुञ्ज्यात् ।
पादादुष्णीषसीमान्त
मष्टाष्टाङ्गुलमीरितम् ।

कला यवोनवाहिश्च तावत्ताव यवत्रयम् ।
P.689 कला सप्ताङ्गुलञ्चैव तावत्कर्मत्रयोदश ।
कला सार्धाङ्गुलन्तालं साङ्गुलत्रयधिकं क्रमात् ।
शिरो नेत्रं पुटान्तञ्च हन्वन्तौ गलकन्धरम् ।
हृदयं नाभिमेढ्रञ्चाप्यूरुजानुस्तथैव च ।
जंघापादतलान्तञ्च तलायामं दशाङ्गुलम् ।
दोर्दण्डसत्कुलायामं प्रकोष्ठञ्च नवाङ्गुलम् ।
तालभागत्रिमात्रं स्यान्मध्याङ्गुलविशालकम् ।
मणिबन्ध त्रिमात्रार्धं तलं भागविशालकम् ।
मध्योदरं पञ्चकलं श्रोणी एकाङ्गुलाधिकम् ।
कटी तदङ्गुलाधिक्य मूरुभागद्वयन्तलम् ।
जानु पञ्चाङ्गुल . . . कलकात्यर्धमात्रकम् ।
तालं पञ्चाङ्गुलन्तारं शेषमूह्यं विचक्षणैः ।
ऊर्वायामेङ्गुलं हीनं जंघायामं तदेव तु ।
जानुन्यर्धतले तावद्दीत्यानाभ्यन्तरेऽङ्गुलम् ।
. दभ्रे . . मामर्ध दीर्घतारं पुरोक्तवत् ।
श्रेयसा षड्यमानोपि विभागं वक्ष्यतेऽजकम् ।
षट्सप्तत्र्यङ्गुलं मूर्ध्नि पादान्तं परिवक्ष्यते ।
शिखरं मातद्वयं सार्ध द्विमात्रं षड्यवन्तथा ।
नेत्रान्त तत्समं नासा ततो हन्वन्तकासमम् ।

गलमर्ध्याङ्गुलं ग्रीव षड्यवाधि कला भवेत् ।
p. 690 हीत्याया हृदयन्तस्मान्नाभि सद्वयवं वसु ।
अष्टमात्रं भवेन्नाभेर्मेढ्रमूलावसानकम् ।
षोडशाङ्गुलमूरुस्याज्जानु षड्यवकोलकम् ।
जंघोरुसदृशा जानुसमं पादतलं मतम् ।
बाहुसप्तकलायाम प्रकोष्ठसमाङ्गुलं दश ।
तालं तुलयङ्गुलं स्यात्तदर्धेनान्तु मध्यमम् ।
सार्धसप्ताङ्गुलं वक्त्रतारं कर्णं षडर्धकम् ।
साङ्गुलस्य मुखं वक्षो बाहन्तं द्विमुखं कला ।
सार्धं पङ्क्त्यङ्गुलं कुक्षौ श्रोणि सार्धाङ्गुलाधिकम् ।
कटि तद्वयङ्गुलाधिक्य मूरुमूलं दशाङ्गुलम् ।
जानुस्कन्धाङ्गुलार्धं स्याज्जंघापश्चार्धमात्रकम् ।
नलकान्त्यङ्गुलार्धं स्यात्तलं पञ्चाङ्गुलाधिकम् ।
कोप्परं पञ्चमात्रं स्याद् द्विमात्रार्धं करान्तकम् ।
शिरो मानाङ्गुलार्धेन स्तनौ सार्धाङ्गुलक्षयौ ।
जंघायामङ्गुलो ऊरुतावन्मध्यतु षड्यवम् ।
काये द्वयर्धाङ्गुलं हीनं खण्डे च द्वयवं मुखे ।
तावद्धावद्वयं पादे जानुन्यापि यवद्वयम् ।
जंघौ च षड्यवं हीनमुरस्ताव क्षयेत्क्रमात् ।
मध्यमश्चाधमं मानं हस्तपादं सुयुक्तितः ।

श्रेयसस्सप्ततालं स्याद्विभागं वक्ष्यतेऽधुना ।
P.691 श्रीरित्रमात्रं केशान्तान्नेत्रान्तं द्व्यर्धाधिकम् ।
सयवत्र्यङ्गुलं नासापुटान्तं तत्समं हनु ।
गलमात्राङ्गुलं ग्रीवा त्रिमात्रं परिकीर्तिता ।
हीत्याया हृदयन्तस्मान्नाभिस्सार्धं नवाङ्गुलम् ।
नवाङ्गुलन्ततो मेढ्रमूरुमेकोनविंशतिः ।
जानुत्रिमात्रजंघोर्वो तुल्यं जानुसमन्तलम् ।
द्वादशार्धाङ्गुलं पादकलायामं प्रशस्यते ।
अष्टाङ्गुलार्धकं वक्त्रं कर्णसप्ताङ्गुलं मतम् ।
सार्धत्रिंशाङ्गुलं वक्षो बाह्वन्तं स्यात्षविंशतिः ।
एकोनविंशतो दीर्घं प्रकोष्ठं सप्तकोलकम् ।
पञ्चाङ्गुलं तलं भागो दीर्घं स्यान्मध्यमाङ्गुलम् ।
पञ्चाङ्गुलं कोर्परान्तं करार्धं त्र्यर्धमात्रकम् ।
सार्धरुद्राङ्गुलं कुक्षौ विशालं साङ्गुलं मुखम् ।
श्रोणीतारं कटीतारं सप्तकोलकमङ्गुलम् ।
ऊरुमूलं दशाङ्गुल्यं जानुस्कन्धाङ्गुलाधिकम् ।
जंघापञ्चार्धमात्रं स्यान्नलका त्र्यङ्गुलाधिकम् ।
तलं पञ्चाङ्गुलार्धं स्याद्विस्तारमिति विद्यते ।
काये द्व्यर्धमुखेऽर्धे द्व्यङ्गुलं जानुजंघयोः ।
हीनं स्यान्मध्यमं मध्याच्चेत्स्याद्व्यङ्गुलक्षयम् ।

स्थानौ सार्धाङ्गुले ह्यूरूजंघयोर्धाङ्गुलक्षयम् ।
P. 692 श्रेष्ठमध्यमयोस्तारन्तुल्यं स्यादधमस्य च ।
सार्धाङ्गुलमुखादीनां विस्तारक्षयमुच्यते ।
बाह्वादि तलपर्यन्तं द्व्यवोनमुदाहृतम् ।
अष्टतालविभागन्तु नवतालविभागवत् ।
सर्वतालविभागन्तु वक्ष्यते पङ्कजासन ।
मुहुर्मुहुः कुञ्चितवामपादं
दोर्दण्डितं वामकरञ्च वामम् ।
विवर्तितं यत्करणं विधिज्ञै-
र्नियोजयेत्तन्नवनीतनृत्ते ॥
मध्ये मूर्ध्नश्चूचुकाक्षस्य मध्ये
सव्यं वामे · · नुले नाभिमध्यात् ।
योन्यावामे द्व्यङ्गुलोक्षस्य मध्ये
वामस्यांघ्रेः सूत्रमालम्बितव्यम् ।
उद्यज्जानुश्चाभि सूत्रप्रमाणं
कक्ष्या योन्याश्चाभि दोर्दण्डहस्तम् ।
मूर्ध्नं केशान्त · · नेत्र प्रमाणं
हृन्मानं स्यात्को प्परार्धस्तदन्यत् ।
रावमवतारकाण्डे कृष्णलक्षणं नाम
नवमोऽध्यायः ॥

श्री

कालिकलक्षणम् —

आदिमूर्तिविधिं वक्ष्ये विधिवत्पङ्कजासन ।
श्रेष्ठकं दशतालेन नियः · मनोहरम् ।
अनन्तोपरि सुखासीनं सर्वसृष्ट्यादिहेतुकम् ।
नवसप्ततथा पञ्च फणानाम प्रकीर्तिता ।
p.693 वलयत्रिसमायुक्तं समवृत्तं समासनम् ।
रिवद् दायतसंयुक्तं यथायोगं यथार्हकम् ।
बेरोदयत्रिभागैकमासनोत्सेधमिष्यते ।
चतुर्भागैकभागं वा प्रमाणं परिगृह्यते ।
वेरोदयस्य चाष्टांशश्चतुरस्त्रं भागिकं भवेत् ।
द्विभागमेकभागं वा आसीनं परिकल्प्यते ।
द्वितालं विशालमेवं स्यात्त्रितालेनायतं भवेत् ।
भागं विशालमायामं त्रिं · · विदतो विदु ।
चतुरस्त्रमात्रयन्त्रीणि खनमानन्तु पूर्वशः ।
वीणानां पञ्च संख्याभिर्विपुलाय धनानि हि ।
द्वित्रिमार्धं त्रियर्धं वा भणानां विपुलं क्रमात् ।
मात्रद्विमात्रकानीव्र भणानामनुपूर्वशः ।
शुद्धकाञ्चनसङ्काशं दक्षिणावलयावृतम् ।
वामांघ्रिमासनोद्धृत्य दक्षिणे तु प्रलम्बयेत् ।
जानुपर्यन्तकं सार्धपञ्चाशत् सप्तमात्रकम् ।

युगद्वयसमायुक्तं यथाशोभञ्च गृह्यते ।
वामाङ्गुष्ठान्तरं सूत्रात्कलारन्ध्राङ्गुलं भवेत् ।
अङ्गुलं सार्धमात्रं वा न्यूनमुक्तप्रमाणतः ।
वसुमात्रं कलासूत्राद्दक्षान्तरमथापि वा ।
सव्यहस्ततलान्तास्मिन्नासने संप्रयुज्यते ।
P. 694 अङ्गुष्ठा · · स्या दूरुमूलं मुखान्तरम् ।
सूत्रान्तं नलकामध्यं रुद्रमात्राङ्गुलं भवेत् ।
वसुरन्ध्रन्तु मात्रं वा यथोचितमथाचरेत् ।
वामदण्डकरं जानुपरिष्टाद्वामपादभाक् ।
सर्वहस्तेन संश्लिष्टं कायन्तद्धृदयावति ।
शंखचक्रगदो हस्तान्तरं कायाद्विमिष्यते ।
मुखान्तरसमायुक्तं धर्ममात्रान्तरा यवा ।
मणिबन्धावती कार्यं बाह्यमन्तरमेव च ।
शंखचक्रास्त्रधर्मेषु जानुपरि च संमतम् ।
नासाग्रोदरमध्यस्था स्पृशेत्सूत्रं प्रलम्बयेत् ।
श्रोणीत्रयर्धाङ्गुलं · · मेढ्रान्तं वेदमात्रकम् ।
सव्यहस्तद्वयोरुमध्यात्पञ्चाङ्गुलान्तरं भवेत् ।
सप्त मात्रान्तरं वापि यथायुक्तप्रमाणतः ।
सूत्रात्सव्यपदाङ्गुष्ठान्तरं दशमात्रकम् ।
सूत्राल्ललाटपर्यन्तं त्रिमात्रान्तरमेव हि ।

नेत्रान्ताज्जानुपर्यन्तं कायमायसमायतम् ।
जङ्घोपरिष्टात्केशान्तं षण्मात्राधिकषष्ठकम् ।
अङ्गुष्ठं दण्डहस्तान्तं द्विमुखश्चान्तरं भवेत् ।
विकिञ्चिदायामवृत्तं वामपादतयोचितम् ।
तत्त्रिभागचतुर्भागे गोदयं समुदाहृतम् ।
P. 195 ललाटसव्याग्रपार्श्वनासा
पुटान्तरे सव्यहनौ स्तनौ च ।
नाभ्यान्तरे मेढ्रकसव्यपार्ष्णे
नीत्वा ष्ठमात्रं प्रलम्बयेत् ।
दक्षिणे दक्षिणे लक्ष्मी भूमिस्थितिकृताञ्जलिः ।
वामपादपदन्तेषां कुञ्चिताभङ्गसूत्रभाक् ।
लक्ष्मीमेदिनी पादान्तं(रं) परं सूत्राच्चतुर्मुखम् ।
मूर्ते सूत्रान्महाभूमेस्थितां प्रेमदयमेवाहि ।
सप्तऋषिः —
अधमं दशतालेन .... मापयेत् ।
सप्तर्षिभिर्देवस्य गु .... पुरस्सरैः ।
कृत्वाञ्जलिसमायुक्तं लक्ष्यसाधनया परा ।
मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः ।
रामो रामश्च रामश्च कृष्णः कल्क्याय ते दश ।
एते दश तिथैः प्रादुर्भवैः प्रागादिकावृतैः ।

पुष्पाञ्जलिं पुनर्दिव्यरूपं ध्यानश्च एव हि ।
कृष्णश्च सुन्दरैर्युक्तैः सनकादिकुमारकैः ।
ब्रह्मेशाभ्यां मुनिभ्याञ्च वाम कृताञ्जलिम् ।
समभङ्गविधिं सूत्रस्थितिताल दशान्तरम् ।
नवतालान्तरं वापि पञ्चाशच्चतुरङ्गुलैः ।
दिव्यसूत्रा द्वादशात्स्वप्रमाणानुगृह्यते ।
नासाग्राच्च भुकाद्दोत्यात्स्थानान्तमुपगृह्यते ।
देवीभ्याञ्च मुनिभ्याञ्च मूर्तेरुन्नतमुत्तमम् ।
ब्रह्मशङ्करयोर्मूर्तेरुन्नतं वापि गृह्यते ।
देवीभ्याञ्च मुनिभ्याञ्च मूर्तेरुन्नतमुत्तमम् ।
ब्रह्मशङ्करयोर्मूर्तेरुन्नतं वापि गृह्यते ।
मेष्ठकं दशतालेन माननीयं विचक्षणैः ।
केशान्तनेत्रपर्यन्तमुत्तमाधम मध्यमम् ।
प्रादुर्भवास्वादृष्टाभिः शङ्करं पङ्कजासन ।
सर्वेषामृषिदेवानां प्रदोक्षीणानतावृतम् ।
दक्षिणे दक्षिणे सव्यविष्टरे पश्चाविष्टरे ।
मानोपमानैः परिमाणलम्ब -
प्रमाणतो स्थानवशे . . . ।
यात्ताद्विवृद्ध्यो विपदां करोन्य -
त्सर्वसंपदाद्याभिकामैः .. ।

इति ब्रह्मीये चित्रकर्मशास्त्रे
प्रादुर्भव काण्डे
आदिमूर्तिविधिर्नाम
दशमोऽध्यायः

ஸ்ரீ.

பெருமாள் கோவிலிலிருக்கும் மியுண்ணிவெங்கா
சாரியார் எழுதின சில்ப சாஸ்திரம்

ஸ்ரீ.